In Public domain. Digitization Muthulakshmi Research Academy

 RE No 25188

हरः ओम् ॥

शिवज्ञानबोधव्याख्यानम् ॥

२०५० गणेशं गुहमीशानमम्बिकां भारतीं गुरून् ।
नत्वा वृत्तिं शिवज्ञानबोधे लेशात्करोम्यहम् ॥

तत्र तावदेतद्ग्रन्थकर्ता को वेति जिज्ञासायां तावदेतानि शिवशक्तिव्यक्तिभूमिभूतानि सन्ति । परोक्षत्रिपदार्थज्ञानात्मकमात्मचिच्छक्त्यर्थक्रियाभूतं त्रिपदार्थविषयत्वेऽपि शिवप्रधानत्वाच्छिवविषयं (शिवविषयं) दीक्षायोगाङ्गत्वेन बोधयन्ति व्यञ्जयन्तीति शिवज्ञानबोधाख्यानि रौरवप्रादेशिकानि द्वादशसूत्राणीति द्राविडदेशीयलोकवादत्वेन तत्रत्यैश्शैवाचार्यैरस्य ग्रन्थकर्ता रौरवकर्तृत्वाच्छिव इति विवक्षितः ॥

पुनः—पूर्वपक्षतया तानि कथितानीह शम्भुना ।
तत्सर्वमधरीकृत्य शिवसिद्धान्त ईरितः ॥
सिद्धान्त एव सिद्धान्तः पूर्वपक्षास्ततः परे ।
मितार्थादमितार्थस्य ज्यायस्त्वमिति सूरय इति

कामिकरत्नत्रयमृगेन्द्रश्रुतेः पूर्वपक्षकोटिगतस्थमितार्थवेदान्तात् सिद्धान्तस्योत्तरपक्षत्वादमितार्थत्वाच्च वेदशिवागमयोस्सामान्यविशेष-

In Public domain. Digitization Muthulakshmi Research Academy

शास्त्रत्वेऽपि शब्दशास्त्रीयसूत्रवत् बाध्यबाधक-
तया द्वैविध्येन क्वचित्प्रकारविरोधेऽपि बहुशोऽर्थै-
क्यात् पुनरुदक्षोर्ध्वस्रोतस्समुज्ज्वलत्साक्षा-
दीशानमुखपञ्चकप्रसृतसिद्धान्तत्वेन चतुर्मुख-
ब्रह्माधिष्ठायकतत्पुरुषादिसद्योजातान्ताधस्स्रोत-
स्समुज्ज्वलच्चतुर्मुखप्रसृतवेदान्तादुत्कृष्टत्वात्
वेदान्तसारसंज्ञितानां हालास्यमाहात्म्यादिप्रसिद्धो-
र्ध्वस्रोतः प्रसृतोत्कृष्टवेदविशेषोक्तिककामिकादि-
शिवागमशिरोभूतानां ज्ञानकाण्डानां वेदान्ताख्यत्व-
मिव स्कान्दप्रमुखप्रसिद्धागमान्ताख्यत्वमस्तीत्या-
गमान्ताख्ये नन्दिनाथाय गणाय शिवेन प्रोक्त-
ज्ञानमागमचतुष्पादमध्यविद्यमाने ज्ञानपादे यथा-
कथञ्चित् पादान्तरेषु च संभूतसारार्थसङ्क्षेप-
निक्षेपसङ्ग्रहस्वशब्दैः शिवज्ञानबोधाख्येन श्रीमता
२०५८ केनचिदाचार्येण कृतानि द्वादशसूत्राणि अतः
शिवज्ञानबोधाख्यानीति कर्णाटकदेशीयलोकवारू-
त्वेन तत्रत्यैश्शैवाचार्यैस्स ग्रन्थकर्ता शिव
इत्युक्तिः काल्पनिकीति शिवज्ञानबोधाख्यः
कश्चिदाचार्य इति विवक्षितः। स तु को वा भवतु।
स कर्ता तावत्तानि पतिपशुपाशत्रिपदार्था-

In Public domain. Digitization Muthulakshmi Research Academy

भिधेयाभिधायकभावसंबन्धानि तत्तिपदार्थ-
विषयविषयीभावसंबन्धिअङ्गज्ञानकार्यैक्यजनक-
सूत्रकारणकार्यकारणभावसंबन्धानि त्रिपदार्थ-
विषयाणि तज्ज्ञाननिवृत्त्यर्थं दीक्षायोगाद्युपदेश-
द्वारा क्वचित्कथञ्चिज्जीवन्मुक्तिसाक्षात् पूर्वं
क्वचित्तदपूर्वं सर्वथा सर्वथा साक्षात्कारकार-
परापरमोक्षफलानि दीक्षितेन तत्कामिनाधिकरण-
पठितव्यानि द्वादशसूत्राणि सुरचितवान्। तत्र
तावल्लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति श्रुतिः।
तथापि तत्रापि शुष्कतर्कनिर्मुक्तातवचस्सु-
प्रसिद्धानि प्रमाणानि कथञ्चित् सल्लक्षणं
वस्तुमात्रं ज्ञापयन्ति। तत्प्रमाणस्फुरितानि
लक्षणानि तथा स्वभूमिभूतं स्वलक्ष्यं वस्तु-
स्वालक्ष्यवस्त्वन्तरेभ्यो व्यावृत्तं कृत्वा स्वशिष्टं
पुनस्तत्प्रमाणविशेषविषयं कुर्वन्ति। ततोऽस्ति
कर्तेत्यनुविद्धपूर्वार्धेन कर्तेति यौक्तिकयौगिक-
संज्ञत्वात् सर्वज्ञस्सर्वकर्तृत्वादित्यनुमित-
सर्वज्ञत्वाविनाभूतेन लक्ष्यपातिसहसिद्धपरीक्षकेण
सर्वकर्तृत्वरूपेण लोकप्रसिद्धसोद्देशलक्षणेन
लक्षितस्य शिवप्रमाणशिवागमशिवयोगप्रत्यक्ष-

In Public domain. Digitization Muthulakshmi Research Academy

क्रमिकसिद्धपरोक्षापरोक्षस्य पशुप्रमाणातीतस्य
पतिपदार्थाख्यस्य कर्तुः कर्तासि न वेत्ययोगि
वादिप्रतिवादिविप्रतिपत्तेः तथास्ति नेति
आव्युत्पत्तिकमननाख्यविचारात्मकपरीक्षा
द्विकोटिमध्यादस्तीत्येककोटिस्थापककरणव्यु-
२०६० त्पत्तिकविचाराख्यलिङ्गव्यवहितशिवज्ञाभि-
व्यक्तचिच्छक्तिलक्षणशिवशास्त्राद्दशिव-
प्रमाणानुमानपाकं पुनरपरार्धेन स पतिपदार्थः
कर्ता । पशुदृक्शक्तेः प्रान्तेः पशुपाशात्मेश्वरस्वतन्त्रो-
ऽतः । सद्भावेन यदुक्तस्सद्भावेश्वर नमोऽस्तु
तस्मै इति व्योमव्यापिस्तवश्रुतेः मायादर्पण-
ब्रह्मबिम्बप्रतिबिम्बासत्यभूता सद्भावेश्वर-
विवर्तवेदान्तीश्वरविलक्षणतया च स्वाभाविक-
दृक्क्रियेच्छा विशालाक्षा सद्भावेश्वररूपतया सिद्ध-
सद्भावेन शुद्धनित्यसत्यभूतेन पञ्चकृत्यकृत्वा-
त्मना पुनस्सर्वज्ञतादिषाड्गुण्यगर्भार्थप्रत्ययो-
न्तरूप सविकल्पनिर्विकल्पज्ञानयोग्यतासापेक्ष-
स्वनिष्ठक्रियार्थक्रियसर्वज्ञत्वकर्तृत्वरूपान्तःस्वरूप-
लक्षणभूत शिवात्मका प्रकृतिप्रकृतेरविकृत्यात्मना
समुन्मिषता स्रष्टृत्वादि संहर्तृत्वान्ता विकृति-

In Public domain. Digitization Muthulakshmi Research Academy

विकृतेरप्रकृतिप्रकृत्यात्मना निर्विकल्पार्थबोधेऽपि
भेदात्मा प्रत्ययः स्थित इति श्रुतेश्शाब्दसविकल्पत्व-
मात्रविधुरप्रत्यर्थान्तरल्पसविकल्पशाक्तान्तर-
नुन्मिषदुन्मिषत् क्रियाकार्थमात्रनिर्विकल्पज्ञानमात्रो-
द्गारोनात्मलयकृत् स्वान्तरुन्मिषत्सूक्ष्मपञ्चकृत्य-
कृदीश्वरः परशिव इति पुनस्सविस्तरं वक्ष्यमाण-
निर्विकल्पसविकल्पोभयोल्लेखिनीच्छात्मपरस्व-
विषयानियतिनियमनशाक्तसविकल्पदृक्क्रियात्म-
बोधगर्वोज्जृम्भसंरम्भात्मभोगकृत् सदाशिव
इति च पुनः स्वबहिरन्तःस्थलयभोगनिर्विकल्प-
सविकल्पोभयोल्लेखिनीच्छात्मपरस्वविषय-
सङ्कल्पितसंकल्पात्माधिकारकृदीश्वर इति च
2061 त्रिधैकधा वृत्तेश्वरत्वेन बहिः स्वरूपलक्षणेन
लक्षितश्शिव इति पतिलक्षणपाठकं प्रथमसूत्रं पठति।

स्त्रीपुन्नपुंसकादित्वाज्जगतः कार्यदर्शनात्।
अस्ति कर्ता स हृत्वैतत्सृजत्यस्मात् प्रभुर्हरः॥

ननु गौतममतादिके प्रत्यक्षमेकं चार्वाकः
कणाद · · गतौ पुनः।
अनुमानं च तच्चाथ सांख्याश्शब्दं च ते अपि।
न्यायैकदेशिनोऽप्येवमुपमानं च केचन॥

In Public domain. Digitization Muthulakshmi Research Academy

अर्थापत्त्युपमाने च तानिवाह प्रभाकरः।
अभावषष्ठान्येतानि भाट्टवेदान्तिनस्तथा ॥
संभवैतिह्ययुक्तानि तानि पौराणिका जगुः।
प्रत्यक्षमनुमानं च सह शब्देन शाङ्करे इति ॥
प्रमाणनिर्वचने शैवप्रमाणत्रयनिर्वचनात् पुनः—
अक्षादिकरणैर्दृश्यं प्रत्यक्षं तदिहोच्यते।
लिङ्गलिङ्ग्यादिविज्ञानमनुमानमिति स्मृतम्।
आप्तोक्तवचनैर्गम्यं शाब्दमेतदुदाहृतम् ॥
तावमादिप्रमाणैस्तु दुर्लक्ष्यं तच्छिवं स्मृतम्।
अप्रमेयमनन्तत्वादनिर्देश्यमलक्ष्यतः ॥
अदृश्यं चेदसद्भावो दृश्यश्चेज्जडिमा भवेत्।
शम्भोस्तद्व्यतिरेकेण रूपं ज्ञेयं विदुर्बुधाः ॥
अनाख्येयस्य तत्त्वस्य निर्गुणस्य यशस्विनी।
गुणवद्ग्रहणं कृत्वा कथयेत्परमेश्वरम् ॥
बुद्धिबोध्यप्रकाश्यत्वं शिवस्यान्यैस्समीहितम्।
शैवमानमविन्दद्भिः पशुमानानुपासितैः ॥
आत्माप्यविषयो यस्य भोक्ता भोग्यत्वतः कथम्।
स्वप्रकाशमसौ देवं प्रकाशयति शङ्करम् ॥
अन्तःकरणवृत्तिर्या बोधाख्या सा महेश्वरम्।
न प्रकाशयितुं शक्ता पाशत्वान्निगलादिवादति

In Public domain. Digitization Muthulakshmi Research Academy

श्रुतेः। प्रमाणलक्षणातीतत्वात् प्रमाणैर्लक्षणेन
वा तैर्विना वा केनाप्यप्रमेयो निर्विशेषो
निर्गुणश्शिवः प्रामाणिकस्सल्लक्षणोऽन्यथा
भूत्वा वा कथं गम्यते। प्रामाणिकस्य सलक्ष-
णस्य च प्रमेयत्वात् लक्ष्यत्वाच्च अप्रामाणिकस्य
२०७ ~ लक्षणहीनस्यावस्तुत्वात् यथाकथञ्चित्प्रमाण-
गम्योऽपि न तावत्प्रत्यक्षगम्यः। बहिरिन्द्रिय-
वाक्चक्षुरिन्द्रियमनोबुद्धिप्रमुखातीतत्वात्।
नानुमानगम्योऽपि व्याप्तिसंकेतग्रहणयोः
प्रत्यक्षमूलत्वात्। सत्यम्। पशुदृष्ट्युक्तः प्राप्तैः
पशुपाशात्मेश्वरस्वतन्त्रोऽतः सद्भावेन यदुक्त-
स्सद्भावेश्वर नमोऽस्तु तस्मै त इति श्रुतेः।
वाक्सहकृतचक्षुरादिबहिरिन्द्रियप्रत्यक्षमनोबुद्धि-
प्रमुखान्तरिन्द्रियप्रत्यक्षपाशयोगप्रत्यक्षपशुयोग-
प्रत्यक्षबोधरूपपरामर्शानुमानपशुशास्त्ररूपागमाख्यैः
पुनः पतिपशुपाशत्रिपदार्थमध्यस्थपाशपशुपदार्थ-
मात्रविषयायाः परमतकृतभावव्युत्पत्तिकायाश्शिव-
मतकरणव्युत्पत्तिकाया निर्विकल्पशुद्धाशुद्धकलादि-
तत्ववृत्तिसूक्ष्मादिवाग्वृत्तिकामिकोल्लिखिताया
परिमितायाः कथञ्चित् क्वचिद्रूपपातिविषया

In Public domain. Digitization Muthulakshmi Research Academy

परिमिता या शब्दाशब्दसाविकल्पकबुद्धिवृत्त्यात्मि-
कायाः पाशज्ञानाख्यायाः प्रमायास्साधकतमैः
पुनस्तया प्रमया तदनुरूपमभिव्यञ्जितायाः आण-
व्युत्पत्तिमात्रायाः करणव्युत्पत्तिकज्ञानाख्य-
पशुचिच्छक्त्यर्थक्रियाभूतायाः कुत्रचिदपर-
पतिज्ञानान्तरितायाः पशुज्ञानात्मिकायाः प्रमायाश्च
करणैः पुनः करणव्युत्पत्तिकपशुज्ञानात्मकैः पुन-
स्तथाकृतव्युत्पत्तिका परपतिज्ञानात्मा परपति-
प्रमाणोपबृंहितैः पुनः पशुप्रणीतपशुशास्त्र-
पठितैरतः पशुदृष्टैरतः पशुप्रमाणैः सद्भिः प्रमाणैः
प्राक्प्रोक्तशिवत्वेश्वरत्वक्रमिकान्तर्बहिः स्वरूप-
लक्षणाभ्यामङ्कितः पतिप्रमाणानामप्यप्रमेयतया
तत्प्रोक्तलक्षणप्रमातृत्वमात्रेण स्फुरन् प्रमेय-
· · · शब्दलिङ्गादिनिरपेक्षत्वतस्तत्सापेक्षत्व-
तस्साक्षादप्यसाक्षादपि पतिशक्तिव्यञ्जत्वतः
परमार्थतः स्वतोऽपि पतिप्रमाणात्मकचित्प्रत्यक्ष-
चिदनुमानचिदागमचिच्छक्त्यपरोक्षवेदन-
स्फुरणैकस्फुरितः प्रमेयश्शिवो न प्रमेयः किन्तु
३०७८ पशुपाशात्मतटस्थलक्षणेन तत्पशुप्रमाणैरसमर्थ-
शैवविषयपतिप्रमाणप्रदेशैश्च तथा तटस्थलक्षणेन

In Public domain. Digitization Muthulakshmi Research Academy

प्रमेयः । तथापि तत्र च लक्षणया शनैस्समर्थशैव-
प्रबोधितैस्तदसमर्थशैवैरपि तथा तत्स्फुरणस्फुरितः
प्रमेयः ततः प्रमाणातीत इत्युक्तम् । मलमात्रमल-
कर्ममात्रोपाध्युपहितात्रत्वात् कर्तृत्वरूपपशुत्वालिङ्ग-
गुणात्मैर्मलकर्ममायोपाध्युपहितकिञ्चिज्ज्ञत्वकिञ्चि-
त्कर्तृत्वरूपसकलालिङ्गगुणात्मपशुशिवशास्त्रपठित-
पशुलक्षणेन च तदन्तरितसाञ्जनसकलापरपति-
लक्षणेन च मलवासनामात्रोपबृंहितमहामाया-
मायोभयकलोपाध्युपहितशाब्दसविकल्पनिरञ्जन-
निरवधिकसर्वज्ञत्वस्वोचितसर्वकर्तृत्वरूपकथ-
ञ्चित्किञ्चिदधिकारमलकृतपशुत्वोपहितमन्त्रमन्त्रे-
श्वरमन्त्रमहेश्वराणुसदाशिवाणुसद्योजाताद्यपर-
पतित्वलिङ्गगुणात्मपतिशास्त्रमात्रपठितापरपति-
लक्षणेन च तदुभयतटस्थलक्षणनिर्मुक्तनिरुपा-
धिकस्वरूपलक्षणान्तःपातनीयत्तटस्थलक्षणस्वरूप-
लक्षणोभयमध्यस्थं स्वान्तर्हितदृक्क्रियात्मचिन्मात्रा-
त्मत्वलिङ्गगुणात्मकं कथञ्चिदुभयः पशुशास्त्र-
पठितं सर्वोपरिपतिशास्त्रपठितमात्मलक्षण-
मित्यपि तदात्मोपध्मातानतिक्रान्तबिन्दुकपरत्व-
पूर्वानतिक्रान्तबिन्दुकसर्वगत्वादिरूपपरत्वलिङ्ग-

In Public domain. Digitization Muthulakshmi Research Academy

गुणात्मकं पतिशास्त्रमात्रपठितं परलक्षणमुभयात्म-
लक्षणपरलक्षणमात्रेण च प्रोक्तशिवप्रमाणैः
स्वरूपतश्शिवो न हि ज्ञेयः। पुनर्महामायोत्पन्न-
तत्त्वतात्त्विकात्मना च पुनर्यथाहं मनोवाक्काय-
समवेतक्रियाहेतोश्शुद्धाशुद्धबौद्धसत्त्वरजस्तम-
स्समुत्थतच्छुद्धाशुद्धबुद्धिसमवेता पूर्वार्थ्य-
208 a संस्कारनाम शुद्धाशुद्धकर्मात्म तत्कर्मोपादान-
भावात्मतद्भावोपादानप्रत्ययात्मतत्प्रत्ययोपादान-
सुखमात्रात्मसुखदुःखमोहात्मसर्वविषया सर्व-
विषयाध्यवसायस्मृतिप्रतिभार्थक्रियाकबुद्धि-
गुणात्मना च पुनस्तन्मूलप्रकाशप्रवृत्तिनियमार्थ-
क्रियाकशुद्धाशुद्धनादप्रकृतिसमुत्थसत्त्वरज-
स्तमोगुणात्मना च पुनस्तद्गुणैः प्रथम-
विकृतिक्रमिकवृत्तचतुरश्रऋजुकुटिलह्रस्वदीर्घ-
स्थूलसूक्ष्मनीलपीतादिरूपादिगुणात्मना च
पुनस्तद्गुणपुञ्जपरिणामवैचित्र्यकाठिन्यकोमल-
करपादोदराद्यवयवात्मना च तत्स्पन्दनात्म-
कर्मात्मना च पाशत्वलिङ्गगुणपशुशास्त्रपति-
शास्त्रपठितपाशलक्षणेन च शिवः प्राक्प्रोक्त-
स्वरूपलक्षणस्सन् साक्षादितरव्यावृत्तः

In Public domain. Digitization Muthulakshmi Research Academy

प्रोक्तशिवप्रमाणैर्न हि ज्ञेयः। किन्तु पञ्चराध्य-स्सदाशिव इति। पुनः- ध्यायेदध्वान्तगन्देवञ्जपे-त्तद्वाचकं जपम्।

क्षित्यादीन्यथ तत्त्वानि तद्रूपाणि कृतानि वै।
योगी वै व्यापकं ध्यायेन्मनीषी दीपरूपिणम्॥
अप्रबुद्धः शिवं ध्यायेद्धृत्पद्मे तु सदाशिवम्।
निर्मलादर्शनप्रख्यश्शरद्वारि समप्रभः॥
बिन्दुरूपश्शिवो ध्येयो नादात्मा तु सदाशिव

इति श्रुतेश्चतुर्मुखब्रह्मप्रमुखपञ्चवक्त्रत्रिपञ्च-दृगुपरिमूर्त्युपबृंहितसदाशिवान्तमूर्तितत्त्व-मूर्तिदीपलिङ्गत्रिकालार्कचन्द्रामृतसागराभ्रभूत-बिन्द्वाकाशरूपादिको भूत्वा यथाकथञ्चिद्ध्य-थाहोपरपत्यात्मतटस्थलक्षणस्सन् पुनरख्या-वृत्तोऽपि लक्षणया कथञ्चिद्ध्यावृत्तो ज्ञेय इति तुर्लक्ष्यो लक्षणातीत इत्यप्युक्तम्। ततस्त-थापि शिवागमपरिभाषाविवक्षया महामाया-मलमायाकर्मतद्धर्मकार्यशिवतत्त्वादिशुद्ध-विद्यातत्त्वात्मपञ्चतत्त्वकलातत्त्वादिपृथिवी-तत्त्वान्तत्रिंशत्तत्त्वतात्त्विकानामचिद्वस्तूनां शिवात्मशक्तीनां च चिद्वस्तूनां यथाहि

२०४६. समवायः कीदृगीदृगित्युच्यते । तावच्छ्रुतिमौनः ।
सर्वात्मनैकदेशेन वा पूर्वद्रव्यत्वादिनिवृत्तौ द्रव्या-
न्तरत्वादिनावस्थानं विकारः । सर्वदा सर्वथा
यथास्थिति मदच्युतिमतां तथात्वेन द्विधैकधा-
वस्थानन्न विकार इति गुरूक्तेः - बिन्द्वाद्यायापि
ये भावास्समानपरिणामिनः । ज्ञानमेव स्थिरं-
न्नित्यं जडवर्गस्य दीपकम् ॥
अभिव्यञ्जकहेतूनां सन्तत्यैव प्रवृत्तितः ।
क्षणिकत्वं तु नित्याया अपि संवित्त्यानुभूयते ॥
धारावाहिकधीश्चापि क्षणिकेवानुभूयते ।
इति शिवागमश्रुतेश्च । जडचिद्विवक्षितं विकृति-
निर्विकृति यथा तथा तदेव तदात्मना वर्तनं समवाय
इति समवायनिर्वचनसङ्क्षेपः । तद्विस्तरश्च
समुद्ध्रियते । शिवमते स्वरूपलक्षणलक्ष्यमात्र-
स्वरूपाह्निकानि चिद्वस्तुन्याधेयाधारत्वकृत-
गौणमुख्यत्वविधुरत्वात् परमार्थतो गुणगुणि-
त्वाभावेऽपि विश्लेषपुञ्जविवक्षितानि गुण-
गुणित्वोपचरितानि ततस्तथोपचरित गुण-
पुञ्जमेव परिणामवैशिष्ट्यात् काठिन्यकोमला-
त्मकतया गुणपुञ्जावयवात्मकं तदवयव -

In Public domain. Digitization Muthulakshmi Research Academy

पुञ्जावयव्यात्मकं च भूत्वावयविद्रव्यसंज्ञितं गुणिद्रव्यसंज्ञितं च तत्र विश्लेषविवक्षायावयवसंज्ञं गुणसंज्ञं च भवति। सादृश्यमेव नित्यानित्यवस्त्वात्मकव्यक्तेरव्यतिरिक्तस्वरूपात्मकं सन्नित्यात्मकमनित्यात्मकं च भूत्वा स्थितमिति नित्यात्मिका पुनरनित्यात्मिका च जातिरुच्यते। पुनस्तत्रानित्यात्मकमपि सादृश्यं कृतकत्वहेतुसिद्धानित्यवस्तुनाशोत्पत्त्युपचारपात्रभूतयोश्शक्त्यात्मव्यक्त्यात्मनोः कारणकार्ययोरपृथक्-

२०१७ स्थित्योः क्रमिकं सता कार्येण सता कारणेन च सहापृथक्स्थितं सत्तदात्मस्वात्मना सादास्तिकं च सद्व्यक्त्यात्मकार्यात्मस्वात्मनः कादाचित्कशक्त्यात्मकारणात्मस्वात्मान्तरात्मस्थितिलक्षणशून्यतया शून्यं सदपि नित्यात्मकमनित्यात्मकं च भूत्वा नित्यात्मिका पुनरनित्यात्मिका च जातिरुच्यते। न हि तार्किकाणामेव व्यक्तिव्यतिरिक्ता सर्वगता वा नित्या तथापि क्वाचिन्नित्यवस्तुन्यनादि प्राथमिकासत्यपृथक्सिद्धा। क्वाचिदनित्यवस्तुनि व्युत्पत्तिसमनन्तरं व्यक्त्या सहापृथक्सिद्धा व्यक्तिनाशे पृथक्सिद्धा वा।

In Public domain. Digitization Muthulakshmi Research Academy

क्रियापि चिद्दस्पन्दक्रियात्मिका सती स्थिररूपिणी
निजदस्पन्दक्रियात्मिका सती शक्त्यात्मव्यक्त्यात्म-
सत्कारणकार्यात्मसाक्षात्तिकक्रियावदात्मनि व्यक्त्यात्म-
स्थितिकालेऽपि कदाचित्तिरोभूय कदाचित्प्रादुर्भूय च
तदात्मना सदा वर्तते । ततः -

तद्वत्स्थं हि वस्त्वेकं सर्वं क्षीरं ततो दधि ।
पश्चात्तक्रं तथा माया विचित्रपरिणामत इति

श्रुतेस्सत्कार्यकारणात्मशक्त्यात्मना तान्यपि सर्वथा
नैयायिकादिविवक्षिताधाराधेयगुणगुणित्वलक्षण-
लक्षितत्वराहित्यात् कान्यपि कानिचिद्वस्तूनीत्य-
निर्वचनीयान्यपि चितेश्चित्सहजो धर्म इति श्रुतेः
सर्वदा सर्वथा वास्तवैकान्तसहजधर्मधर्मिभूतं -
स्वरूपलक्षणलक्षितत्वान्निर्वचनीयानीति स्वतो
बहिर्मुखान्तमुखानान्नीलादीनां ज्ञानादीनां च
स्वान्तर्मुखबहिर्मुखस्वरूपक्रमिकविवक्षया
विवक्षितेन जडचिद्विवक्षितसविकारनिर्विकार-
बहिर्मुखस्वरूपमात्रविवक्षितानां स्वतःसिद्ध-
संहति मनःक्लृप्तविश्लेषक्रमिकाविवक्षया विवक्षि-
तेन गुण्यात्मना गुणात्मना च तादूप्यतादात्म्येन
२०९६ वर्तनं समयः । तथा विवक्षितेनावयव्यात्मना -

In Public domain. Digitization Muthulakshmi Research Academy

वयवात्मना च ताद्रूप्यतादर्थ्येन वर्तनं च सम-
वायः । प्रागनुपदमेव प्रोक्तरीतिमात्रेणैव विवक्षित-
विश्लेषजातिव्यक्त्यात्मना तथा तादात्म्येन वर्तनं
समवायः । तथा विवक्षितविश्लेषमात्रक्रिया क्रिया-
वदात्मना तथा तादात्म्येन वर्तनं च समवायः
विशेषपदार्थस्य सार्वत्रिकस्वीकृतत्वाभावात्
तथात्वेऽपि प्रोक्तरीत्या व्यक्त्यात्मकत्वात् तथा
वर्णनमिति न पृथग्वर्णनं तद्वैतच्छिवसिद्धान्त-
सिद्धसमवायसंबन्धोऽपि तदेकस्यैव वस्तुनः
स्वात्मस्वात्मान्तरवस्त्वन्तरात्म सादास्तिक-
स्थित्यात्मकव्यापार इति समवायो नैयायिका-
द्यभ्युपगतसमवायजजायमानद्रव्यं क्षणमगुणं
तिष्ठतीति क्षणं चिरं वा स्थित्वा कयोश्चिन्मध्ये
कस्यचिद्धेयतया पुनरजायमानद्रव्यं चिद-
चिदात्मद्रव्यादिकं सादास्तिकयोः कयोश्चि-
न्मध्ये क्वचिदीश्वराप्यपरमाण्वादिके
कस्यचिज्ज्ञानरूपादिकस्याहेयतया सादास्तिक-
कादाचित्कयोः कयोश्चिन्मध्ये क्वचिदात्मपार्थिव-
परमाण्वादिके कस्यचिज्ज्ञानरूपादिकस्य
कदाचिद्धेयतयापि सदापि सगुणमगुणं

In Public domain. Digitization Muthulakshmi Research Academy

तिष्ठतीत्याधाराधेयतयायुतसिद्धयोरुभयोः पदार्थ-
योस्संबन्धो हि सम्बन्धिभ्यां भिन्नस्तदुभया-
श्रितोऽप्येकषषट्पदार्थेष्वन्यतमो व्यक्तिव्यतिरिक्तः
पदार्थान्तरस्सन्न हि पृथक्पदार्थो विशेषणविशेष्य-
भावादिरिव सम्बन्ध्यपृथक्स्वरूपत्वात् । संयोगोऽपि
परस्परस्पर्शनात्मना द्विधा भूत्वा संबन्धिनो-
रव्यतिरिक्तत्वेन स्थितवान्ते विभागात्मनापि तन्
वर्तेत इति सान्तरिकसंबन्ध्यपृथक्स्वरूपात्मक
इति न पृथक्पदार्थः । ततः पारमार्थिकस्वरूप
पर्यालोचने शिवशक्त्याख्य द्विधैकधावृत्तचैतन्ये
तथावृत्तदीपशक्त्यादिके च शिवशक्तिरात्मा
शक्तिर्दीपश्शक्तिरित्यादिकान्तर्मुखबहिर्मुख-
स्वरूपविशिष्टैकदेशविवक्षामात्रोद्भूतोभयव्यष्टिभ्यां
तदुभयान्तरविशेषचितस्वरूपतदुभयविशेषस्वरूप-
व्यष्टिभ्यां वा बहिर्मुखस्वस्वरूपमात्रविवक्षया
विचित्रेऽत्र पक्षिणि नीलपीतश्यामरक्तशुक्लवर्णात्म-
चतुरश्रवृत्तह्रस्वदीर्घस्वोचितावयवावस्थित-
संस्थानात्मद्विरूपशब्दस्पर्शरसगन्धगुणास्तद्गुण-
पुञ्जपक्षतुण्डचूडाग्रीवोरश्शिरःपादपुच्छावयवाश्च
समग्रं सन्तीत्यादिसमुदायविवक्षामात्रोद्भूतोभय-

In Public domain. Digitization Muthulakshmi Research Academy

समष्टिभ्यां विचित्रेऽत्र पक्षिणि निरूपरूपतुण्डं वास्तीति विशिष्टैकदेशविवक्षामात्रोद्धृतव्यष्टि-समष्टिभ्यां तदन्तर्मुखबाहिर्मुखस्वरूपयोस्तथो-द्धृतव्यष्टिभ्यां वा संहितान्योन्यानाहितातिशय-सहकरणमात्रोपकार्योपकारकान्योन्यसहकारि-सापेक्षस्वभावस्वस्वसामर्थ्यमात्रनिर्वर्तनीय-भावव्युत्पत्तिकज्ञानगमनादिविचित्रस्वस्वार्थ-क्रियाकृतां कर्तृकरणव्युत्पत्तिकज्ञानादीनां नीलादीनां वोपचरिते गुणगुणित्वे परीक्षिते सिद्धे न निरुप-चरिते सिद्धे भगवता रामकण्ठनिरूपगुरुणापि ज्ञानादिकन्नीलादिकं च किमपि वस्तुमात्रमनि-र्वचनीयमपि स्वरूपलक्षणलक्षितं सन्निर्वच-नीयमतस्तयोः परमार्थतो गुणगुणित्वे न हि स्त इति किरणवृत्त्यादिके बहुधा साधितम् ।

तदुक्तं च पौष्करे —

न गुणी कश्चिदर्थोऽस्ति जडो गुणसमाश्रयः।
गुणा एवानुभूयन्ते गुणिसंज्ञाश्च संहिताः॥
वैचित्र्यात्परिणामस्य गुण एव गुणा गुणी।
गुणानां संहतिर्द्रव्यं विश्लेषो गुणसंज्ञित इति॥

पुनर्मानसिकबौद्धाहङ्कारिकसगुणनिर्गुणविषय-

In Public domain. Digitization Muthulakshmi Research Academy

निर्बाधितखण्डाखण्डान्तःकरणवृत्तिप्रत्यक्षप्रमेय-
प्रतिभासमानात्मेश्वरात्मब्रह्मवादिनां परमार्थतो
बुद्ध्यात्मचिदात्मस्वात्मवादिनान्नैयायिकसांख्य-
पातञ्जलवेदान्तिप्रमुखानामपि परार्थविषय-
विवक्षायामिव स्वार्थविषयविवक्षायां प्रमातृसिद्धि-
र्दुर्लभेति तथापि प्रमेयत्वजडत्वं प्रसङ्गादन्यथापि
ख्यत्वादित्यपि स्वपरप्रकाशस्फुरितत्वमात्मे-
२१०-ब श्वरब्रह्मणः स्वयमापतेत् । ततः स्वार्थविवक्षायां
प्रत्यात्मनियतैकैकात्मशिवपारमार्थिकचैतन्येषु
यथास्वं प्रत्यग्रूपिण्यामखण्डितायामात्मनाम्न्यां
यथास्वं स्वात्म · · · सर्वार्थज्ञकर्तृरूपसाञ्चे-
शानन्दस्वरूपलक्षणशिवत्वभृते पराक्दृगात्मदृश्य-
दृग्रूपस्वदृग्दृगन्तरदृग्रूपप्रत्यग्दृगात्मस्वदृग्रूपैक-
दृक्त्वेनातो दृश्यतादृश्यताराहित्येन तत्स्वसंवित्स्फु-
रणतः प्रतिभासिन्यां पराग्रूपिण्यामचलतयातो-
ऽखण्डिततयात्ममूर्तिभृतायां शिवमूर्तिभृतायामात्म-
शक्तिनाम्न्यां शिवशक्तिनाम्न्यां यथास्वं स्वस्यां
स्वस्यां परसंविदि स्वात्मप्रमातृप्रमाणाभ्यां
परात्मप्रमातृप्रमाणाभ्यां वा दीपस्य स्वप्रकाशे
प्रकाशतया प्रकाशिनि परप्रकाशे स्वप्रकाशेन

In Public domain. Digitization Muthulakshmi Research Academy

प्रकाशान्तरेण वा प्रकाशत्वन्नास्ति यथा तथा
प्रमेयत्वमेव नास्ति । ततस्तां स्वां परसंविदं
प्रति स्वकीयाः पुनरविशेषचितस्स्वकीयाया-
स्संविदो वा परकीयायाः स्वसंविदः परकीयायाः
परसंविदो वा तत्फलस्य वा प्रमातृत्वं प्रमाणत्वं
प्रमातृत्वं च नास्ति । तथापि -

अदृश्यं चेदसज्ज्ञानो दृश्यश्चेज्जडिमा भवेत् ।
शम्भोस्तद्व्यतिरेकेण रूपं ज्ञेयं विदुर्बुधाः

इति श्रुतेः यथाकथञ्चिद्यथास्वं स्वचैतन्यविषये
चैतन्यान्तरविषये वा प्रोक्तं तद्रूपं स्वकीय-
च्चैतन्यं परकीयच्चैतन्यं वा यथार्हं पुनरप्रमातृ-
त्वेन प्रमाता पुनरप्रमाणत्वेन प्रमाणं पुनरप्रमेय-
त्वेन प्रमेयं पुनरप्रमितित्वेन प्रमितिः तत्रापि
यथास्वं चैतन्यविषयविवक्षायां परसंविदेव
पराग्रूपतया परसंविदात्मना प्रत्यग्रूपतया
स्वसंविदात्मना च वर्तत इति पराग्रूपपरसंवि-
त्प्रत्यग्रूपस्वसंविद्रूपान्तरविशेषचिद्रूपप्रमातृ-
२११a प्रयुक्ते तत्परसंविद्रूपप्रमेयविषयस्वार्थक्रियात्म-
ज्ञानरूपप्रमितिफले प्रत्यग्रूपस्वसंविल्लक्षण-
प्रमाणे पराक्चिद्रूपतया परसंवित्तत्स्वसंवि-

In Public domain. Digitization Muthulakshmi Research Academy

त्प्रमाणस्वरूपतो भातीत्यप्रमेयमपि कथञ्चित्प्रमेयं
स्वसंवित्प्रमाणान्तद्विसंविदन्तराविशेषचित्प्रमाता
प्रमाणव्यापारः स्वसंवेदनं प्रमितिः। ततः
प्रमात्रादिचतुष्टयस्य सौक्ष्म्यं प्रतीयते। पुनरत्र
परसंविल्लक्षणप्रमेयमेव स्वसंविल्लक्षणप्रमाण-
स्वरूपप्रतिपत्त्यर्थेन्न हि प्रमाणान्तरापेक्षेति
नानवस्था। स्वेतरचिदचित्पदार्थविषयविव-
क्षायां तु तदविशेषचिद्वयिद्विशिष्टा स्वसंवि-
त्प्रमाता। परसंवित्प्रमाणं परसंविदर्थक्रिया-
प्रमितिः। दृश्यत्वकार्यत्वाभ्यां च पराग्दृगात्म-
दृश्यदृग्रूप स्वसदृग्दृगन्तरदृग्रूपप्रत्यग्दृगात्म-
स्वदृग्रूपैकदृक्त्वेन च क्रमिकं जडवस्तु च चिदन्तर-
वस्तु च प्रमेयम्। ततः शिवब्रह्ममुक्तशिव-
ब्रह्मपरमात्मान्तरभिव्यक्त शिवब्रह्माणं रूपं प्रत्येकं
सच्चिदानन्दैकचिद्रूपमेव न तु चिन्मूलं सत्स-
-च्चिदानन्दैकचित्स्वरस्वाभिकमपि तदपि किमिति
पृष्टे नैयायिकादीनामिव किमपि तज्जडमि-
त्यापतितम्। यदि तदपि चित्तर्हि तन्मूलक्लृप्ते-
रनवस्था दुस्तरापतेत्। ततस्सिद्धं चिद्रूपं
तथापि न वेदान्तिनामिव चिन्मात्रं किमपि वा

In Public domain. Digitization Muthulakshmi Research Academy

तावच्चिन्मात्रमित्युक्ते चिदचिदोरविशेषदोषः
स्यात् । अथापि वेदान्तिनां चिन्मात्रमपि कुलो-
ऽयं तेषां अभिव्यक्तत्रिगुणात्मिका प्रकृतिरेव
मायेति तदुद्भूतबुद्ध्यादिक्षित्यन्ततत्त्वतात्त्विको-
परि माया महामाया मायोद्भूतत्रिगुणात्मप्रकृति-
मूलानभिव्यक्तगुणप्रकृत्यादिशिवान्ततत्त्वता-
त्त्विकान्तत्प्रतिबन्धकसंभवात् महामायामयी-
भूतोन्मनिमूलान्तरुपरि चोन्मोषच्चिन्मात्रं तु
शिवागमैकदृष्टं मतान्तरदृगदृष्टम् । तत्तु परत्व-
शिवत्वात्मनोपास्यं सत्तथा भवितव्यम् ।
यथाकथञ्चिच्छिवयुक्तं शिवदीक्षितैस्तच्चिन्मात्र-
मुपासितं चेत् "... षकलं तु जानीयात्पुरुषं
लोकपावनमिति" श्रुतेश्शिवतत्त्वाध्वस्थ्यतु षकल-
बिन्दुतत्त्वप्राप्तिर्भवति । पुनः कथञ्चित्प्रकृते-
२११b रुपरि च तद्विविक्तमदृष्टमपि दृष्टमिव कृत्वा
सांख्यपातञ्जलवेदान्तिभिरात्मवादिभिरदृष्ट-
शिवैरुपासितम् । रागतत्त्वाध्वः पुरुषतत्त्वप्राप्ति-
हेतुर्भवति । तदुक्तम् —

वेदान्तज्ञाश्च सांख्याश्च योगिनः पुरुषे स्थिताः ।
इति स्वच्छन्दे ॥

In Public domain. Digitization Muthulakshmi Research Academy

भित्वा तु व्यापिनी देवि समनायान्मनस्त्यजेत् ।
मनसा तु मनस्त्यक्त्वा जीवः केवलतां व्रजेत् ॥
जीवो वै केवलस्तत्र आत्मा ज्ञानक्रियान्वितः ।
बन्धनाशेषनिर्मुक्तस्सत्तामात्रं व्यवस्थितः ॥
समस्ताध्वपदातीत इऽउद्ध विज्ञानकेवलः ।
गृह्णाति न परं भावं न परं च शिवात्मकम् ॥
परापर वि निर्मुक्त स्वात्मन्यात्मा व्यवस्थितः ।
आत्मव्याप्तिर्भवेदेषा शिवव्याप्तिरतः परम् ॥
पाशावलोकनं त्यक्त्वा स्वरूपालोकनं हि यत् ।
आत्मव्याप्तिर्भवेदेषा शिवव्याप्तिरतोऽन्यथा ॥
सर्वज्ञादि गुणा येऽर्था व्यापकान् भावयेद्दृढा ।
शिवव्याप्तिर्भवेदेषा चैतन्ये हेतुरूपिणि ॥
बन्धनाशेषभावेन सर्वाध्वोपाधिवर्जितः ।
विदित्वा परमं तत्त्वं शिवत्वं कल्पितं तु यैः ॥
तदात्मोपासका वैते न गच्छन्ति शिवं परम् ।
आत्मतत्त्वं गतिं यान्ति आत्मतत्त्वानुरञ्जिताः ॥
तस्मादात्मा परित्याज्यो यदीच्छेच्छिवमात्मनः ।
आत्मतत्त्वन्ततस्त्यक्त्वा विद्यातत्त्वे नियोजयेत् ॥
उन्मना सा तु विज्ञेया मनस्संकल्प उच्यते ।
सङ्कल्पस्स्वयंतो ज्ञेयमुन्मनं युगपत्स्थितम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

तस्मात् सा च परा विद्या यस्मादन्या न विद्यते ।
विद्यते ह्यत्र युगपत् सर्वगादिगुणान् परान् ॥
वेदनाद्यादिधर्मस्य परमात्मप्रबोधनात् ।
व्यञ्जनात्परमार्थत्वे तस्माद्विद्येति सोच्यते ॥
तत्रस्थो व्यञ्जयेत्तेजः परं परमकारणम् ।
परस्मिन् तेजसि व्यक्ते तत्रस्थश्शिवतां व्रजेदिति ॥

किमपीत्युक्तेऽपि किमपि वस्तुमात्रमित्याहृत-व्यावर्तकलक्षणत्वादसदसत्त्वं सत् सत्यमपि मूढं स्यात् । तत्पदं किमपि स्थितमित्यादिश्रुतिरपि प्रोक्तवद्दृक्त्वेन स्वयं भासनाद्दृश्या दृश्यत्वमात्र-निबोधिका । तदुक्तं किरणे —

ग्राहकत्वाच्छिवः स्वन्यो ग्राहकत्वात्पुमानपि ।
२।२० नाभावाच्छून्यमित्युक्तमन्ययापेक्षयात्र त्विति ॥

ननु तर्हि तद्रूपं सच्चिदानन्दलक्षणकं भवतु । तन्नाधाराधेयक्लृप्तेरनयोरनभिमतन्नैयायिक-मीमांसकादीनामाभिमतन्निरूपचरितनिर्गुणत्व-निर्लक्ष्यत्वनिर्वचननिराकारकं सगुणत्वसल-क्ष्यत्वं समापतेत् ॥

ननु तर्ह्याश्रयाश्रयिभावतटस्थलक्षणनिर्मुक्त-सच्चिदानन्दरूपस्वरूपलक्षणं भवतु । तथा भवतु

In Public domain. Digitization Muthulakshmi Research Academy

तत्र चिन्निर्विषया सविषया वा। यदि निर्विषया तर्हि चिदचिद्योरविशेषदोषग्रस्ता स्यात्। न चाचितो सत्यत्वान्नैव दोष इति वाच्यम्। वेदनार्थक्रियाविधुरत्वान्मूढा सत्यचितोऽपि सत्यत्वादचित्स्यात्। यदि सविषया प्रपञ्चस्य सत्यत्वन्त्वदनाभिमतं समापतेदिति तत्प्रपञ्चस्य सत्यत्वात् किञ्चिद्विषया चेत् क्वचिदज्ञा स्यादिति सर्वविषया सर्वज्ञाभ्युपगन्तव्या। ननु सतो सदपेक्षत्वाच्चितो चिदपेक्षत्वादानन्दस्याप्यानन्दापेक्षत्वाच्चितः पुनश्चैत्यापेक्षत्वात् सर्वज्ञत्वस्यापि सर्वापेक्षत्वादिदं सर्वं तटस्थलक्षणं सदौपाधिकं स्यादित्यनुमानात् तत्पदं किमपि स्थितमिति श्रुतेश्च किमपि किञ्चिदस्तीति गम्यते। तन्न किमपि किञ्चित् सदपि मूढं पुनरप्रयोजनं असदसत्यं वा पर्यवसितं भवतां भवतु। मास्मांक तर्हि कथमियं श्रुतिः कथयति। सत्यम्। दृश्यादृश्यत्वान्निषिध्य दृक्त्वमात्रं कथयतीति प्रागेवोक्तम्। नहि सापेक्षत्वात् सर्वमिदमौपाधिकं किन्तु स्वरूपमेव। तत्र कदाचिदप्रकाशकत्वसर्वदाहकत्वरूपं स्वरूपमेव। पुनर्यथा

In Public domain. Digitization Muthulakshmi Research Academy

क्षित्यादिसहकारिसन्निधिसापेक्षमपि सर्वज्ञत्व-
२१२ b सर्वकर्तृत्वसच्चिदानन्दैकचिदेकस्वभावमेव न
नश्यम् । सर्वज्ञत्वकर्तृत्वादेः गङ्गाप्रवाहादे-
रिवाज्ञत्वाकर्तृत्वादिलक्षणतटे जडे पाशे
किञ्चिज्ज्ञत्वकिञ्चित्कर्तृत्वादिलक्षणतटे जडे
पशौ च क्वचिदप्यदृष्टत्वात् तदवच्छिन्नब्रह्मसु
सिद्धमिति कदाचित् असर्वज्ञत्वासर्वकर्तृत्व-
किञ्चित्कर्तृत्वभोक्तृत्वरूपमौपाधिकं सिद्धम् ।
ततो भेदधिक्कारादिषु ब्रह्म न सर्वज्ञम् ।
धर्मित्वाद्घटवदित्यादीन्यतत्त्वज्ञैर्वेदान्तिभि-
रुक्तानि प्रतिक्षिप्तानि । स्वप्रकाशमात्रं
सच्चिदानन्दस्वरूपं स्वरूपमिति तत्प्रदर्शिके-
रुक्तमपि दुरुक्तं स्यात् । तथाहि परप्रकाश
इत्यत्र त्वन्मते परपदार्थप्रपञ्चशून्यत्वात्
प्रकाशपदार्थस्वप्रकाशशून्यत्वमपि स्वयमा-
पतेदिति न प्रपञ्चशून्यमात्रञ्चिदचित्सर्वशून्यं
भवेदिति जगदान्ध्यं भवेत् । ततस्सर्वार्थ-
स्वार्थपरार्थविषयं स्वपरप्रकाशसच्चिदा-
नन्दैकचिद्रूपं स्वरूपमिति स्वीकर्तव्यम् ।
ततः शिवेन सह मुक्तिसमरसीभावमात्रमुक्तिः ।

In Public domain. Digitization Muthulakshmi Research Academy

पाशानामपि पाशमुक्तत्वान्नापि तेन सह शिव -
समरसीभावमात्रं मुक्तिः। प्रोक्तनीतेः स्वसंवि -
द्रात्मशिवस्य परसंविद्रात्मशक्त्या विना शून्य -
त्वात् पर्यवसितो मोक्षः। मुक्तिस्समरसीभाव -
शिवसमरसीभावात्मक एव ततः स्वप्रकाशिका
स्वसंवित्स्वार्थविषय प्रत्यक्छ्राकतगर्वसंरम्भा -
वध्यानात्मद्दाक्क्रियेच्छार्थक्रियावृत्तिस्सविशेषापि
तस्यास्तद्र्वसंरम्भावनोल्लिखितपरार्थविषय -
परागबोधोज्जृम्भसंकल्पाख्यद्दाक्क्रियेच्छात्म -
परसंविदर्थक्रियां प्रत्यन्तरप्रमेयस्वविषयत्व -
सुलक्षितसूक्ष्मत्वात् स्वक्तनिर्विशेषा सा
आम० स्वसंविन्निजसंज्ञिता परप्रकाशिका परसंवित्प्रोक्त -
द्दाक्क्रियेच्छार्थक्रियावृत्तिस्सविशेषा वृत्तिसंज्ञिता।
तथापि नहि द्वे ज्ञाने स्तः। किन्तु स्वसंविद -
निर्दृप्रथमपरागविकृतिभ्रमणकमणरूपपरार्थ -
स्वार्थविषयार्थ विषयार्थक्रियाकपराग्रूपशक्ति -
संज्ञितपरसंविदिति। पुनः परसंविदनिर्दृप्रथम -
प्रत्यविकृतिभ्रमणक्रमणरूपस्वार्थैकार्थविषयार्थ -
क्रियाकप्रत्यग्रूपशिवसंज्ञित तदुभयान्तर विशेष -
चिद्पृथग्वृत्तस्वसंविदित्यपि वृत्तप्रोक्तसर्वार्थ -

१ २१३ इति तैरवानीये २१४ इति तालपत्र लिखितम्। ...

In Public domain. Digitization Muthulakshmi Research Academy

ष्टाक्रियेच्छात्मत्रित्रिधैकधावृत्तपरसंवेदनस्व-
संवेदनात्मद्विधैकधावृत्तैकार्थक्रियाककर्तृकरणा-
त्मत्रित्रिधैकधावृत्तद्विधैकधावृत्तसच्चिदानन्दैक-
शिवचिद्रूपमेकं ज्ञानं पर्यवसितम् । सच्चिदानन्द-
मित्यत्र चितः प्रागेव निरस्तनिर्विषयत्वात् सतो-
ऽप्यविवादास्पदत्वात् सांसारिकप्रथितानन्दस्यापि
सत्त्वगुणवृत्तिरूपसुखरूपाभिव्यक्तिस्वरूपत्वात्
मौक्तिकोऽप्यानन्दतटस्थलक्षणनिर्मुक्तिनिष्पन्न-
स्वरूपलक्षणान्तस्थसहजसर्वज्ञतादिषड्गुणस्वभेद-
सच्चित्सर्वज्ञकर्तृत्वरूपस्वरूपलक्षणस्थितस्याप्य-
शिवत्वाभिव्यक्तिरेव नान्य इति सुपरीक्षितत्वात् ।
स चानन्दोऽप्यनादिमुक्तादिमुक्तशिवयोस्समान-
स्ततस्तत्सच्चिदानन्दरूपलक्षणमपि तथा तयोः
स्थितम् । न किञ्चिदन्तरम् । तथात्वेऽपि केचि-
दाधुनिका वेदान्तव्यवहारा भ्रष्टसिद्धान्तव्यवहारा-
श्शैवास्स च आनन्दशिवब्रह्मणः कश्चिदखण्डैक-
रसस्वस्वामिसंबन्धानिर्मुक्तिनिष्पन्नस्वरूप-
लक्षणभूतगुण इति कृत्वा तत्संपृक्तसच्चित्त्वात्
सच्चिदानन्दादितथाभूतस्वरूपलक्षणानन्तकल्याण-
२१५b गुणलक्षणविशिष्टा शिवब्रह्मणो मात्रं मुक्तशिव-

In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्मणां मुक्तात्मनोऽपि शिवा इति श्रुतेश्शिवत्व-
मस्ति यद्यपि तदीदृग्लक्षणन्नास्तीत्यतश्शिवत्व-
साम्याभावान्न शिवसाम्यमुक्तिरिति कथयन्ति ।
ते पुनस्तथा मुक्तशिवब्रह्मणां तथाभूतसच्चिदा-
नन्दरूपत्वाभावात् असत्यत्वजडत्वासंपूर्णमनो-
रथत्वादिकमापतेत् । पुनरथवा तद्गीतेश्शिवा-
त्किञ्चिन्न्यूनं तत्तुल्यन्तावद्रूपमस्तीत्युक्तमप्य-
संपूर्णमनोरथत्वमेवापतेदित्यबुध्यन्तः पुनः
प्रोक्तरीतेस्सञ्जात् सर्वज्ञकर्तृत्वरूपस्वस्वामि-
संबन्धनिर्मुक्तिनिष्पन्नस्वरूपलक्षणभूतशिवत्वा-
भिव्यक्तेरेव गुणप्रकाशगुणश्रुतिभूतगुणात्मत्वेना-
नाद्युदयमात्रमविवक्ष्य शिवस्यापि तथेत्यखण्डै-
करसशिवैकरसता शब्दार्थो शिवानन्दसमानाशिव-
समानाशेरेवाभूतस्वशिखानन्द इत्यजानन्तो
भ्रमन्तोऽतः प्रतिक्षिप्ताः । तथानन्दशब्दार्थः
समर्थितः श्रीमता रामकण्ठेन किरणवृत्तौ - .

किरणाख्यं महातन्त्रं परामृतसुखप्रदमित्यत्र ।
परञ्च - तत्सर्वार्थव्यापकत्वादमृतञ्चाविनश्वरम् ।
यत्सुखं परा परिपूर्णता सर्वज्ञत्वसर्वकर्तृत्वाभि-
व्यक्तिः । तद्ददात्युपायत्वेनाभिव्यनक्तीति

In Public domain. Digitization Muthulakshmi Research Academy

परामृतसुखप्रदम् । व्योमव्यापिस्तवेऽपि -
नियमेन नैतन्मुक्तिसुखं पूर्णतां ददात्यपि तु सर्वेभ्यो
भूतेभ्यस्सुखप्रदो यो नमोऽस्तु तस्मै त इति ।
तदुक्तं च रौरवे -
एवं दीक्षाविशुद्धात्मा देहस्थोऽपि न देहभाक् ।
निर्दग्धाशेषपाशत्वाज्जीवन्मुक्तश्शिवैकधीः ॥
देहपाते चिदानन्दं शिवैकरसतां व्रजेत् ।
न पुनर्देहमायाति सरित्तोयमिवाम्बुधौ ॥
निजानन्दं सदा पश्यन्न पश्यत्यखिलं जगत् ।
सत्तामात्रं जगत्सर्वं पश्यन्नपि न भोग्यतः ॥
साक्षात्कारे समाधौ तु सर्वथा न हि पश्यति ।
पुनरपि रौरवे -
२१६a एवं शैवाध्वरं प्राप्य दीक्षामन्त्रसमुद्भवम् ।
न पुनर्जन्मतां याति दीक्षितो मनुजोत्तमः ॥
भिन्नदेहे शिवो भूत्वा शिवधर्मसमन्वितः ।
शिवानन्दमनुप्राप्य त्वविभागाय कल्पते ॥
जलं सामुद्रमासाद्य नदी मृ. म्बुवाहिनी ।
क्षारतोयत्वमायाति प्रभावाद्धि महोदधेः ॥
एवं वै देहभिन्नात्मा शिवमेवाधिगच्छति ।
गुणसाम्यमात्रैकदेशदृष्टान्तः नोत्तरः

In Public domain. Digitization Muthulakshmi Research Academy

निर्वेत्स्यमाणविशिष्टाद्वैतविवक्षया सर्वात्मना ।
तदुक्तं सिद्धान्तरहस्ये —
क्षीरे क्षीरमिवाभिन्नं विभिन्नं दृष्टिदृष्टिवत् ।
शिवात्मनोस्सामरस्यं व्यज्येत गुणसाम्यत इति ॥
निश्वासकारिकायां च —
परशुभावाद्यतीत्य पतिभावेन तिष्ठति ।
तत्तस्य गमनन्नाम सर्वगे गमनं कुतः ॥
उन्मनत्वं शिवत्वं च प्रयातीत्युपचर्यते ।
संबोधो गमनन्नाम सर्वगे गमनं कुत इति ॥
मृगेन्द्रे च —
तद्व्यानं समावेशो जननं दृक्क्रियोदयः ।
अधिकारस्तु साम्राज्यं भोगाह्लादे निजः परः ॥
पाशातीतो महान्नित्यो लयस्तत्तुल्ययोगितेति ।
सकले निष्कले चैव सर्वत्रैव समानता ।
सायुज्यमिति तत्प्रोक्तं सायुज्यं मूर्तितुल्यता ॥
सर्वज्ञाद्यं शिवैश्वर्यं लब्ध्वा स्वात्मनि राजते ।
तत्सायुज्यमिति प्राहुर्वेदागमपरायणा इति
चिन्त्यविश्वविद्यासारसंहितावश्रुतेः । शिवब्रह्म-
मुक्तशिवब्रह्मपश्चात्मान्तरनभिव्यक्तशिव-
ब्रह्मणां स्वरूपं प्रत्येकं शिवत्वरूपितमभिव्यक्त-

In Public domain. Digitization Muthulakshmi Research Academy

मनभिव्यक्तं सदृशं स्थितम् । तदुक्तं कामिकादिके

शिवरूपम् -

सहजानन्दसन्दोहस्वसंविल्लक्षणात्मक ।
परसंवित्स्वरूपिण्या शक्त्या परमया युत ॥

अन्यत्र च -

आनन्दाभिमुखं प्रत्यक् बाह्यार्थाभिमुखं पराक् ।

रत्नत्रये - परानपेक्षं स्वरूपं यद्विज्ञानं शिवसंज्ञितम् ॥
तस्य शक्तिः परापेक्षः रूपमाहुर्मनीषिणः ॥
इच्छा कार्यमनिच्छापि कुर्वाणेच्छा चिदन्वया ॥
215 - ज्ञानमज्ञानरूपैवमक्रियापि क्रियान्वया ॥

पौष्करे -

अनयोर्ज्ञानयोर्हेतुरविशेषात्मिका चितिः ।
शक्तिरुक्ता विकल्पा सा महती मूर्तिरीश्वरी ॥

कामिके - शिवतादात्म्यरूपम् -

नापि देहो न चाक्षाणि न प्राणो न मनस्तथा ।
नाहङ्कारो न बुद्धिः स्यात्स्वपरज्ञातृभावतः ॥
जीवत्यपि सुषुप्त्यादौ व्यासङ्गे चैव लक्ष्यते ।
अतः प्रदीपवद्भाति प्रेरयन्नखिलं वपुः ॥
निसर्गेऽपि च चैतन्ये सर्वगे सार्वकालिके ।
अनादिमलसञ्छन्नो न जानाति स्वयं प्रभुः ॥

In Public domain. Digitization Muthulakshmi Research Academy

तस्मात्परोक्षं विज्ञानं स्वस्वरूपावभासकम् ।

पौष्करे -

यन्नित्यरूपं विज्ञानं तच्च निर्विषयात्मकम् ।
पक्षोऽध्यक्षानिरस्तोऽयं स्वपरग्राहकत्वतः ॥
अणोः प्रत्यक्षसिद्धत्वान्नानुमाध्यक्षबाधिका ।
न च निर्विषयं ज्ञानं परापेक्षं स्वरूपतः ॥
किञ्चानुभूयते ह्यात्मा स्वपरात्मप्रकाशकः ।
परप्रकाशकत्वं च नित्यान्नित्यगुणो यतः ॥
स्वपरग्राहकस्तस्मात्सर्वदात्माऽव्यवस्थितः ।
तद्वत्स्वतोऽमी सर्वज्ञाः किञ्चिज्ज्ञत्वं तु कारणात् ॥

मृगेन्द्रे -

ऽवमातिष्ठतस्तस्य विनैवाकारकल्पनाम् ।
अकिञ्चिच्चिन्तकस्यास्य रूपमुन्मीलति स्वकम् ॥
सर्वार्थदृक्क्रियारूपमानन्दमयमव्ययम् ।

पौष्करे -

परार्थमात्रसंवित्तिरूपं तच्छक्तिसंज्ञितम् ।
सहजं तस्य तज्ज्ञेयं तन्मलेन निरुध्यते ॥
तस्मिन्निरुद्धे यत्कार्यं प्रत्यर्थं वेदनात्मकम् ।
न जायते ततः कार्यतिरोधानं मलास्थितम् ॥

कामिके - ज्ञानं द्विविधमाख्यातं वृत्तिरूपन्निजं तथा ॥

In Public domain. Digitization Muthulakshmi Research Academy

निर्विशेषान्निजं रूढं नैवोपप्लवते स्थिरम् ।
वृत्तेरमी विशेषाः स्युः संविदाद्याश्च सुव्रताः ॥
मले विदारिते जन्तोरिच्छया शिवनिष्ठया ।
तथा च स्वप्नवच्छक्तिर्बुद्ध्या सह विजृम्भते ॥
२।८ ~ निजतेजोऽन्यदेवोक्तमनावरणवासि यत् ।

पराख्यायाम् –

चिद्रूपमात्मनो रूपं दृक्क्रियागुणलक्षितम् ।
ज्ञानरूपस्य तस्यापि स्वरूपं दृक्क्रियात्मकम् ॥

मृगेन्द्रे -

चैतन्यं दृक्क्रियारूपं तदस्त्यात्मनि सर्वदा ।
सर्वतश्च यतो मुक्तौ श्रूयते सर्वतो मुखमिति ॥

तथागमान्तरे -

योगिनस्सर्वथा सर्वज्ञत्वकर्तृत्वलक्षणम् ।
स्वतन्त्रमनवच्छिन्नं स्वस्वरूपं प्रकाशत इति ॥

तदेवं स्वरूपलक्षणसिद्धेः प्रोक्तरीतेर्निर्गुण - निष्कल निष्कलातीत शिवमुक्तशिवशिवत्वार्ह - विविक्तात्मनां स्वरूपं नैयायिकपातञ्जलवेदान्ति - नामिव खण्डाखण्डमनोबुद्ध्यहङ्कारवृत्तिगोचरम् । प्रकृतिप्रभृतिबन्धगलनकृतनिर्विषयत्वकृतजड - कल्पं चिन्मात्रं समाधिभूतं स्वपरसाक्षात्कारविधुरं

In Public domain. Digitization Muthulakshmi Research Academy

कैवल्यं पर्यवसितश्शून्यं स्वप्रकाशमात्रं वा न स्यात् ।
पुनराचैतन्यात् शून्यकल्पत्वाच्छून्याद्वा । ततः साक्षा-
च्छिवसन्निहितस्य सिद्धसमाधिभूतशिवयोग-
संस्कृतेः सर्वथाविष्करणीय शिवत्वाभिव्यक्ति-
चिकीर्षोरपरोक्षाख्येन भावव्युत्पत्तिकसाक्षात्कारापर-
नाम्ना प्रमितिरूपेण चिच्छक्त्यर्थक्रियालक्षणेन
भावार्थेन प्रत्यक्षेण पुनरपरोक्षाख्यं तदकर्मकत्व-
स्फुरणस्फुरितं कर्मव्युत्पत्तिकसाक्षात्कारनामानं
यथाकथञ्चित् प्रमेयरूपकर्मार्थप्रत्यक्षं शिवं
देहोजीवन्मुक्तसिद्धशिवयोगिनस्संबन्धिनि
नाकरणाकृतिरिति तत्साक्षात्कारार्थं करणभूते पुन-
रपरोक्षाख्ये करणव्युत्पत्तिकसाक्षात्कारापरनाम्नि
प्रमाणरूपे चिच्छक्तिलक्षणे करणार्थे प्रत्यक्षे लक्षे
शनैः प्रासादमन्त्रकलादिव्यवधानादुद्गम्य साक्षा-
त्कृतसान्निध्याना ततः प्रत्यक्षनाम्नो शिवशक्तिचि-
च्छक्तिव्यञ्जिका पुनस्तदङ्गयोगाख्यशिवसाक्षा-
२१६ b त्कारार्थे अङ्गयोगाख्यध्यानेन शिवं युयुक्षोर्ज्ञात्वा-
कृतिरिति परोक्षाख्येनानुमितिरूपेण चिच्छक्त्यर्थ-
क्रियालक्षणेन भावव्युत्पत्तिकेनानुमानेन तदकर्मत्व
स्फुरणस्फुरितं कर्मव्युत्पत्तिकानुमाननामानं

In Public domain. Digitization Muthulakshmi Research Academy

शिवञ्जिज्ञासोर्जीवन्मुक्तसाध्यशिवयोगिनस्स-
म्बन्धिनि नाकरणाकृतियोगाङ्गतत्परोक्षज्ञानार्थं
करणम्भूते प्रत्यक्षेणान्यथा वा कार्यमात्रस्य
कर्तृमात्रेण वाचकमात्रस्य वाच्यमात्रेणापि व्याप्ते-
स्संकेतस्य च ग्रहणात् जगत्कर्तृसाधनप्रवृत्त-
कार्यत्वलिङ्गकलितव्याप्तिग्रहणाहितसंस्कृति-
समुद्भूतिसमुत्थबौद्धवृत्त्युपहितचिदंशव्याप्ति-
स्मृतिवृत्तिके क्वचित् कस्यचिन्मते स्वतोऽनु-
मानाख्येन सिद्धान्ते चिच्छक्तिलक्षणानुमान-
व्यञ्जकत्वमात्रोपचारबीजानुमानाख्येन लिङ्ग-
कलितेन विकल्पात्मकेन बौद्धप्रकाशपरामर्शेनो-
पहिततथानुमानाख्यसविकल्पतृतीयज्ञानात्म-
लिङ्गविषयचिदंशपरामर्शरूपवृत्तिमति प्रमाण-
रूपे चिच्छक्तिलक्षणे करणव्युत्पत्तिकेऽनुमाने
लक्ष्ये बुद्धिव्यवधानेन कृतसन्निधाना ततोऽनु-
माननाम्नो शिवशक्तिश्चिच्छक्तिव्यञ्जिका
पुनस्तदङ्गयोगाख्यध्यानेन शिवं युयुक्षो-
र्ज्ञात्वाकृतिरिति परोक्षाख्येन प्रमितिरूपेण
चिच्छक्त्यर्थक्रियालक्षणेन भावव्युत्पत्तिकेन
शिवागमेन तदकर्मत्वस्फुरणास्फुरितं

In Public domain. Digitization Muthulakshmi Research Academy

कर्मव्युत्पत्तिकागमनामानं शिवज्ञिज्ञासोर्जी-
वन्मुक्तसाध्यशिवयोगिनस्सम्बन्धिनि नाकर-
णाकृतिरिति योगाङ्ग तत्परोक्षज्ञानार्थं तत्करण-
भूते श्रुताधीतबुद्ध्युपारूढकामिकादिवातुलान्त-
शिवागमतन्त्रमन्त्रपदवाच्यवाचकसंकेतग्रह-
पूर्वज्ञाप्यज्ञापकभावसंबन्धाख्यवाचकशक्ति-
ग्रहाहितसंस्कृतिसमुद्भूतसमुत्थबौद्धवृत्त्युप-
२१७ हितचिदंशसंकेतस्मृतिपूर्वशक्तिस्मृति-
वृत्तिके क्वचित् कस्यचिन्मते स्वत आगमा-
ख्येन सिद्धान्ते चिच्छक्तिलक्षणशिवागम-
व्यञ्जकत्वोपचारबीजशिवागमाख्यशिवशब्द-
विषयेण ततः कथञ्चिदागमाख्येन विकल्पात्मकेन
बौद्धप्रकाशेनोपहित तथागमाख्यस्वविकल्पतच्छब्दार्थ-
विषयचिदंशपरामर्शरूपवृत्तिमति प्रमाणरूपे
चिच्छक्तिलक्षणे करणव्युत्पत्तिके शिवागमे लक्षे
शिवदिव्यागमशब्दानुविद्धाध्यात्मिकशिवागमशब्द-
विषयबुद्धिव्यवधानेन कृतसन्निधाना ततः आगम-
नाम्नी शिवशक्तिश्चिच्छक्तिव्यञ्जिका शिवं प्रति
स्वतस्सिद्धप्रमाणभूता मुक्तशिवं प्रति निरस्त-
समस्तप्रमाणभावलिङ्गिनी मुमुक्षुं प्रति

In Public domain. Digitization Muthulakshmi Research Academy

ताच्चिच्छक्तिप्रमाणाभिव्यङ्ग्याभिव्यञ्जकसंबन्धो-
पचरितप्रमाणभाववती शिवशक्तिश्चिच्छक्ति-
व्यञ्जिका। तदित्थं शिवशक्तिव्यञ्जितैः स्वव्यापार-
शिवप्रमासाधकैः स्वचिच्छक्तिलक्षणैः शिवदिदृक्षु-
सिद्धशिवयोगिशिवयुयुक्षुशिवजिज्ञासुसाध्य-
शिवयोगिविवक्षितैकद्विक्रमिकप्रत्यक्षानुमानागम-
शिवप्रमाणैरशिवं शिवीभूतात्मान्तरवर्गं यथा-
कथञ्चित्तथाभूततदर्हात्मान्तरवर्गन्तथाभूत-
न्तदर्हं वा स्वात्मानञ्चानभिव्यक्तविविक्त-
शिवजीववर्गं च साक्षाच्छिवं दिदृक्षुः सिद्ध-
शिवयोगी शिवं युयुक्षुश्शिवजिज्ञासुस्साध्य-
शिवयोगी च क्रमिकं साक्षात्पश्यति। साक्षात्का-
रार्थध्यानार्थं ज्ञात्वानुष्ठानमिति व्यवहित-
ञ्जानाति ध्यायति समाधत्ते च। पुनः कथ-
मुच्यते। कैश्चिद्वेदान्तिभिरिव कैश्चित्सिद्धा-
न्तिभिः सर्वज्ञतादिषाड्गुण्यपरिपूर्णस्वप्रकाश-
सच्चिदानन्दादिकं तटस्थलक्षणमिति प्रोच्यते।
तदयुक्तम्। तथा चेत् पुनश्शिवमुक्तशिवा-
नभिव्यक्तशिवात्मनां रूपं कीदृग्वक्तव्यम्।
यदि किमपि किञ्चिदित्युच्यते। परचिद्रुचि --

In Public domain. Digitization Muthulakshmi Research Academy

द्वात्मकं द्वयमेव वस्तु तृतीयन्नेति परीक्षित-
त्वाच्चिद्द्वात्मकं वा स्यान्नो चेत्तच्छून्यं वा
स्यात् । पुनराचिद्द्वात्मकमनभिमतमिति
चिदात्मकं चेत् तर्हि तच्चिन्मात्रमित्युक्तेऽपि
चेत्यापेक्षिका स्वापेक्षिका च सती स्वप्रकाश-
स्वसंवित्परप्रकाशपरसंविच्च भूत्वा सा चित्
सहजस्वरूपसद्द्वानन्दसर्वे . . . स्सह सिध्येत् ।
ततः प्रोक्तसच्चिदानन्दात्मकं लक्षणं श्वेतो
गच्छतीतिवत् जगत् सत् सृजति चित् सृजति
आनन्दस्सृजतीत्यत्र पुनरजहल्लक्षणया श्वेत-
गोवत् सच्चिदानन्दात्मशिवात्मवाच्यार्थ-
लक्ष्यार्थयोर्मध्ये सच्चिदानन्दात्मवाच्यार्थ-
स्यापि तटस्थलक्षणत्वाभावेन तादात्म्येना-
पृथक्सिद्धमिति पृथग्विवक्षितस्वस्वामित्वा-
भावात् शिवत्वमिव शिवतादात्म्येन स्वरूप-
लक्षणमेव भवति । गङ्गायां घोष इत्यत्र जह-
ल्लक्षणया स्वन्यभूतगङ्गास्थघोषाधारत्ववाच्यार्थ-
सद्भूततीरस्थघोषाधारत्वलक्ष्यार्थयोरता-
दात्म्याभावेन गङ्गाधारत्वघोषाधेयत्वविवक्षित-
स्वस्वामित्वाभावात् यदिदं लक्षणं तटस्थ-

In Public domain. Digitization Muthulakshmi Research Academy

लक्षणं तद्वत्सच्चिदानन्दादिकं तटस्थलक्षणं
न भवति । पुनर्मधुरं जलमित्यत्र जहदजह-
ल्लक्षणया कतकबीजेन हीयमानजलपदवाच्यार्थ
पङ्कत्वमुपादीयमानजलपदलक्ष्यार्थजलत्व-
मित्युक्तं तटस्थलक्षणस्वरूपलक्षणोभयलक्षणा-
त्मकं यदिदं लक्षणं तद्वत्सच्चिदानन्दादिकन्तदु-
भयलक्षणात्मकं च न भवति । पुनस्तदुपलक्षित-
शिवकन्तत्त्वमसीत्यत्र जहदजहल्लक्षणया भूता-
त्मादिमन्त्रात्मान्तपञ्चात्मयोगेष्वन्यतमेन
प्राणायामादिषडङ्गोपकृतसालम्बशिवयोग-
कर्मयोगेन तदसामर्थ्ये तथा तेष्वन्यतमेन
विवेकमात्रोपकृतसालम्बशिवयोगज्ञानयोगेन
वा हीयमानत्वं पदवाच्यार्थभूतात्मान्तरात्म-
तत्त्वात्मजीवात्ममन्त्रात्मपञ्चात्मजीवत्वमुपा-
दीयमानत्वं पदलक्ष्यार्थासिपदलक्ष्यार्थशिव-
२१४ ~ त्वाहं चिन्मात्रात्मत्वमित्युक्ततटस्थलक्षण-
स्वरूपलक्षण उभयलक्षणात्मकं यदिदं लक्षणं
तद्वत्सच्चिदानन्दादिकं तदुभयलक्षणात्मकं च
न भवति । पुनस्तदुपलक्षितशिवकन्तत्त्वमसी-
त्यत्र जहदजहल्लक्षणया प्रोक्तयोगेष्वन्यतमे-

In Public domain. Digitization Muthulakshmi Research Academy

नैव हीयमानतदुपलक्षितशिवपदवाच्यार्थ-
भूतात्मादिमन्त्रात्मान्तपञ्चत्वोपरि आगमान्तो-
पहिता कथञ्चिदणुशम्भुपक्षब्रह्मादिसहिता
परपतीश्वरत्वमुपादीयमानतदुपलक्षितशिव-
पदलक्ष्यार्थपरशिवत्वमित्युक्ततटस्थलक्षण-
स्वरूपलक्षणोभयलक्षणात्मकं यदिदं लक्षणं
तद्वत्सच्चिदानन्दादिकत्तदुभयलक्षणात्मकं च
न भवति। पुनस्तदुपलक्षितशिवकत्तत्त्वम-
सीत्यत्र जहदजहल्लक्षणया प्रोक्तयोगेष्वन्य-
तमेनैव हीयमानासिपदवाच्यार्थसाक्षात्कार-
वदभिनयध्यानस्तिमितोदधिवन्निश्चल-
ध्यानात्मसमाध्युपाद्यान्तक्रमिकचिन्मात्रात्मत्व-
परशिवत्वद्वितयमुपादीयमानासिपदार्थ-
शुद्धशिवत्वमित्युक्तस्वरूपलक्षणान्तःपात-
नीयोपचरिततटस्थलक्षणस्वतः स्वरूप-
लक्षणोभयलक्षणात्मकं यदिदं लक्षणं तद्वत्त-
त्सच्चिदानन्दादिकतदुभयलक्षणात्मकं च
न भवति। ननु तत्त्वमसि चित्त्वमस्यानन्द-
मसीत्यत्र जहदजहल्लक्षणया तटस्थलक्षणे
पञ्चात्मत्वे हीयमाने सत्युपादीयमान-

In Public domain. Digitization Muthulakshmi Research Academy

तदुपलक्षित शिवपदलक्ष्यार्थे परमात्मोपर्ययेऽपि पद-
लक्ष्यार्थे शिवी भवत्वं पदलक्ष्यार्थात्मानमुप-
लक्ष्य स्वयमपि पुनरजहल्लक्षणया तादृगात्मनः
स्वरूपलक्षणं भूत्वा तिष्ठतीति न कोऽपि विरोधः॥

ननु पुनरनन्तशक्तिविश्लेषो वानप्रस्थत्व-
मिष्यते। केवलं शिवसद्भावो यतित्वमिति
निर्दिशेदित्यनन्तशक्तिविश्लेषत्वम्। कथ-
मियं श्रुतिः। कथयति। सत्यम्। सर्वज्ञ-
तादिषड्गुणमध्यपठितानन्तशक्तेरनादि-
मध्यनिधनाव्याहृतार्थत्वात् पुनरत्रानन्त-
शक्तिविश्लेषत्वन्नाम तेदकं विषयानन्त्यात्
भेदानन्त्यं प्रपद्यते।

218 b कर्तृत्वं तदभिन्नत्वात् तद्भेदेवोपचारत इति
मृगेन्द्रश्रुतेर्महाप्रलयेन योगविवेकभावनया
वा कृतज्ञे · · · · ऽत्मविषयप्रलये ज्ञेयकार्य-
विषयौपाधिकविभागभेदविवक्षितज्ञानक्रियार्थे-
क्रियानन्त्यवैकल्यात्तथा तत्कृतक्लृप्तिकशक्त्या-
नन्त्यवैकल्येन शक्तिरेकैव श्रुतेः। परार्थे -
स्वार्थद्विसंविदात्मैकशक्तित्वमनन्तशक्ति-
विश्लेषत्वन्तदेव वानप्रस्थत्वं तत्रापि स्वसंवि-

In Public domain. Digitization Muthulakshmi Research Academy

न्मात्रविवक्षया केवलं शिवसद्भावो यतित्वन्नान्य-
दिति कथयति । तत्रापि-

तमश्शक्त्यधिकारस्य निवृत्तेस्तत्परिच्युतौ ।

व्यनक्ति दृक्क्रियानन्त्यं जगद्बन्धुरणोश्शिव

इति पुनः श्रीमन्मृगेन्द्रश्रुतेरविभागेन स्वरूप-
तोऽन्तरङ्गतास्सिद्धभेदृक्क्रियार्थक्रियानन्त्य-
वैकल्यात् कारणभेदनियतत्वात् कार्यभेदस्येति
न च कारणवैकल्यं विना कार्यं न जायत इति
श्रीपौष्करश्रुतेस्तत्कारणानन्तशक्तिविश्लेषो
ज्ञानप्रस्थत्वमिति न हि व्याख्येयम् । तस्यान-
न्त्यस्य स्वरूपत्वात् स्वरूपहानेस्सर्वशून्य-
प्रसंगात् । विशेषतः प्रत्यर्थवेदनशून्यप्र-
संगात् सृष्ट्याद्यनुपपत्तेश्च । ततो दाह-
प्रकाशवदविभागभेदेन यदानन्त्यन्तत्स्व-
रूपमेव । तथा हि-

न च निर्विषयं ज्ञानं परोपेक्षं स्वरूपत इति
श्रुतेः परसंवेदनार्थक्रियात्मनापि वृत्तसंवेदनात्म-
भावव्युत्पत्तिकज्ञानार्थक्रियाकर्तृकरणव्युत्पत्ति-
कैकज्ञानमित्युक्तैका शक्तिस्तावत् स्वसंवेद-
नार्थक्रियात्मनापि वृत्तपरसंवेदनार्थक्रियाकर्त्री

In Public domain. Digitization Muthulakshmi Research Academy

सती पुनस्तथा परार्थस्वार्थप्रत्यर्थविषया सती
तदनन्तरपृथगुपलक्षितानन्तज्ञानानन्तक्रिया-
* 218 नन्तेच्छार्थक्रियाकर्त्री सती च क्रियाशक्तीच्छा-
शक्त्यात्मनापि वृत्ता ज्ञानशक्तिरिति ज्ञानशक्ती-
च्छाशक्त्यात्मनापि वृत्ता ज्ञानशक्तिरिति च
भूत्वा तिष्ठति। पुनस्तथान्योन्यात्मनापि वृत्ता
तदन्तरपृथगुपलक्षितानन्तज्ञानशक्तिरनन्त-
क्रियाशक्तिरनन्तेच्छाशक्तिरतो विभागा सत्य-
नन्तशक्तिरिति च भूत्वा तिष्ठति। पुनः कर्तृ-
शक्तिमदिच्छितृशक्तिमद्वात्मनापि वृत्ता ज्ञातृ-
शक्तिमान् ज्ञातृमदिच्छितृशक्तिमद्वात्मनापि
वृत्तः कर्तृशक्तिमान् ज्ञातृशक्तिमत् कर्तृशक्त्या-
त्मनापि वृत्त इच्छितृशक्तिमानिति च भूत्वा
तिष्ठति। पुनरन्योन्यात्मनापि वृत्तस्तदन्तर-
पृथगुपलक्षितोऽनन्तज्ञातृशक्तिमान् अनन्त-
कर्तृशक्तिमाननन्तेच्छितृशक्तिमानतो विशिष्ट-
स्सन्ननन्तशक्तिमानिति च भूत्वा तिष्ठति।
पुनस्तच्छक्त्यर्थक्रियाभूतं संवेदनमेव। न च
निर्विषयज्ञानमित्युक्तत्वात् स्वसंवेद्यात्मनापि
वृत्तपरसंवेदनं भूत्वा तिष्ठति। पुनस्तदेव

* पत्रद्वयेऽपि 218 इति संख्या दत्ता वर्तते।

In Public domain. Digitization Muthulakshmi Research Academy

परसंवेदनं परसंवेदनात्मस्वात्मनापि वृत्तस्वसंवेदनं भूत्वा तिष्ठति । पुनस्तदेव द्विरूपं संवेदनं तथा परार्थस्वार्थोर्थविषयं सत्क्रियेच्छात्मनापि वृत्तं ज्ञानमिति ज्ञानेच्छात्मनापि वृत्ता क्रियेति ज्ञानक्रियात्मनापि वृत्तेच्छेति भूत्वा तिष्ठति । पुनरन्योन्यात्मनापि वृत्तन्तदन्तरपृथगुपलक्षितमनन्तज्ञानन्तथा वृत्ता तथोपलक्षितानन्तक्रिया तथा वृत्ता तथोपलक्षितानन्तेच्छा ततस्त्रयाणां ज्ञानत्वादविशिष्टमनन्तज्ञानमिति च भूत्वा तिष्ठति । तदित्थं पुनरविभागभेदान्तरपृथगेकधा द्विधा त्रिधानेकधा वृत्तानन्त्यं शक्तिमतश्शक्तेश्शक्त्यर्थक्रियाया वा स्वाभाविकं सिद्धम् । प्रागुक्तविभागभेदबहिः पृथगानन्त्यमौपाधिकं सिद्धम् । तदुक्तं रत्नत्रये मृगेन्द्रे पौष्करे च —

इच्छा कार्यमनिच्छापि कुर्वाणेच्छा चिदव्यया ।
ज्ञानमज्ञानरूपेवमक्रियापि क्रियात्तथा ॥
तमश्शक्त्यधिकारस्य निवृत्तेस्तत्परिच्युतौ ।
व्यनक्ति दृक्क्रियानन्त्यं जगद्बन्धुरणोश्शिव इति

त्रयः ॥

In Public domain. Digitization Muthulakshmi Research Academy

दृक्क्रियारूपिणी शक्तिः कथिता परमेश्वर ।
तेन च विज्ञेयकर्तव्यविरहे न कदाचन ॥
न हि यस्मात्परं कार्यं ज्ञत्वकर्तृत्वरूपतः ।
शक्तिकार्ये तिरोधानममलेन कथितम् ॥
२४८ शक्तिर्नार्थान्तरं यस्मात् कार्यं तद्वद् शङ्कर ।
ईश्वरः- न शक्तिरेव कर्तव्यं शक्तिदृक्क्रिययोर्यतः ॥
अविभागस्य भांगोक्तौ तद्विभाग उपाधितः ।
प्रत्यर्थमपि संबन्धस्तत्कार्यमितरं तु यत् ॥
परामात्र संवित्तिरूपं तच्छक्तिसंज्ञितम् ।
सहजं तस्य तज्ज्ञेयं तन्मलेन निरुध्यते ॥
तस्मिन्निरुद्धे तत्कार्यं प्रत्यर्थं वेदनात्मकम् ।
न जायते ततः कार्यतिरोधानं मलात्स्थितमिति ॥

ततोऽनादिमध्यनिधननिरुपाधिकनिरतिशयनिरपेक्षशाक्तसर्वार्थार्थमात्रपरात् पातात्मनिर्विकल्पज्ञानात्मस्वापृथक्कृतेच्छाकक्रियात्मङ्कलर्थक्रियेति तज्ज्ञानार्थक्रियान्तरविकल्पसविकल्पप्रत्यर्थसर्वार्थपराक्पातात्मज्ञानात्मस्वापृथक्कृतेच्छाकक्रियात्मञ्यर्थक्रियेति च वृत्तार्थक्रियाकरणेन सर्वज्ञतादिपदसहकृतसच्चिदानन्दादिपदलक्ष्यार्थेन सर्वज्ञत्वसर्वकर्तृत्वसंज्ञितसर्वार्थज्ञान-

In Public domain. Digitization Muthulakshmi Research Academy

शक्ति सर्वार्थक्रियाशक्तिद्विरेकशक्तिद्विशक्ति-
क्रमिकत्रिकत्रिकभेदसर्वज्ञतानृप्त्यनादिबोध-
स्वतन्त्रतालुप्तशक्त्यनन्तशक्तिसहजसच्चिदानन्द-
शिवादिशिवगुणरूपेण पुनरत एव निर्वाच्यत्व-
वागतीतत्वनिर्मन्तव्यत्वमनोऽतीतत्वनिर्गुणत्व-
गुणातीतत्वनिर्विशेषत्वनिर्विशिष्टत्वनिष्प्रमेयत्व-
निष्प्रमाणत्वप्रमाणातीतत्वनिर्लक्ष्यत्वनिर्लक्षणत्व-
लक्षणातीतत्व किमपि किञ्चिदित्यानिर्वचनीयत्व-
निर्वाचननिर्वाहकेण पुनरत एवाभोग्यतया दृश्य-
प्रपञ्चदृगपि सदृश्यादृश्यवैसादृश्यस्फुरणोपस्फु-
रणस्फुरितैकजातिसंज्ञितसादृश्यसम्बन्ध-
स्फुरणोपस्फुरणस्फुरितस्वसदृगदृगन्तरदृगपि
सत् पुनस्तादृक् स्वदृगपि परार्थस्वार्थसर्वार्थ-
दृक्कार्यप्रपञ्चसर्वार्थकृदपि सन् प्रत्यात्मानं
पृथक्पृथक् स्थितैकसदानन्दाद्वैतैकचित्त्वात्मना
स्वरूपलक्षणेन शिवत्वेन केनचिदपहितेन तेन
च सुलक्षितन्तत् सात्मवर्गं शिवं स्वज्ञ स्व-
वित्लक्षणेतरवस्तुव्यावृत्तं यथा तथा सिद्ध शिवयोगी
२१९० साध्यशिवयोगी च क्रमिकं साक्षात्पश्यति । पुन-
स्साक्षात्त्वार्थध्यानार्थं ज्ञात्वानुष्ठानमिति

In Public domain. Digitization Muthulakshmi Research Academy

व्यवहितं जानाति । पुनस्साक्षादिव ध्यायति ।
समाधत्ते च — पुनः कथमुच्यते । हिति
हलमात्रप्रासादोल्लिखितनिरुद्धहंसमन्त्रमध्यबीज-
बिन्द्वात्मकशून्यकुम्भकस्तूतिमत्केवलकुम्भक-
कृतध्यानोद्धृतिमदुन्मन्यन्ते हृदि षोडशकलाढल-
प्रासादोन्मनी शिरोऽन्तस्थनिरुद्धहंसमन्त्र-
मध्यबीजबिन्द्वात्मककेवलकुम्भककृतध्याना-
द्धृतिमदुन्मन्यन्ते द्वादशान्ते वा तटस्थलक्षण-
निर्मुक्तेः क्षुत्पिपासादिवत् किमपि किञ्चि-
त्स्फुरणोपस्फुरणस्फुरितपर इति पठितपर-
शिवमात्रपरार्थस्वार्थविषयविजृम्भणतया
परसंवित्स्वसंविदुन्निष्पन्ननिर्भासस्वरूपतया
स्तिमितोदधिवत् स्थितिमत्तया किञ्चिदन्त-
स्थज्ञानक्रियात्मनोत्कर्षवपुष्मत्तया निर्विषय-
वदुज्ज्वलत्तथोपचरिततया चोपलक्षितकिञ्चि-
दन्तस्थक्रियाकज्ञानात्मसमाधिपूर्वोभयं
स्वग्रस्त किञ्चिद्द्वयमित्यन्तःस्फुरिततरव्यावर्त-
कार्यपदलक्ष्यार्थचिन्मात्रात्मस्वबीजवान्
तदुपलक्षितशिवपदलक्ष्यार्थपरोपरि परिस्तीर्णो-
ऽस्तिपदलक्ष्यार्थशिवात्मशिवभूतरुद्धशिव

In Public domain. Digitization Muthulakshmi Research Academy

इति स्वग्रस्तकिञ्चिदहमित्यन्तस्फुरितेतरव्या-
वर्तकाहम्पदलक्ष्यार्थचिन्मात्रात्मस्वबीजबान्
तदुपलक्षितशिवपदलक्ष्यार्थपरोपरि परिस्तीर्णो-
ऽसिपदलक्ष्यार्थस्वात्मशिवभूतश्शुद्धश्शिव इति
च समुत्क्षिपद्भ्यामभेयस्फुरणरूपाभ्यां भाव-
व्युत्पत्तिकार्थक्रियारूपदीपप्रकाशवत्पृथग्द्विधैक-
धोपलक्षिताभ्यां प्राक् प्रोक्तरीतेः परसंवित्स्वसंवि-
त्तुन्निष्पन्नाभ्यां साक्षात्काराभ्यां जडचिदन्तर-
सर्वार्थैस्सह तच्छुद्धशिवद्वयं साक्षात्पश्यति।
पुनस्तत्साक्षात्त्वार्थध्यानार्थं ज्ञात्वानुष्ठानमिति
व्यवहितज्ञानागति पुनस्साक्षादिव ध्यायति।
समाधत्ते च। पुनः कथमुच्यते-
आत्मा परश्शिवश्चेति त्रिपदार्थास्त्रिचेतनाः।
त्रिशून्योदयसंभिन्नास्त्वन्तदस्य त्रिसम्भवाः॥
बिन्दुर्नादश्च शक्तिश्च परश्चैव परात्परम्।
ब्रह्मप्राप्त्यवधिश्चैव आत्मानन्दसुखंभवेत्॥
२१९-८ परात्मानन्दसंप्राप्तिरन्नप्राशनमुच्यते।
भिन्ने देहे शिवो भूत्वा शिवधर्मसमन्वितः॥
शिवानन्दमनुप्राप्य त्वविभागाय कल्प्यत इति
श्रीज्ञानसिद्धिचिन्त्यविश्वसौरवश्रुते:

In Public domain. Digitization Muthulakshmi Research Academy

स्वकीयात्मानन्दपरानन्दं शिवानन्दसमूहं यथा तथा साक्षात्पश्यति तत्साक्षात्त्वार्थध्यानार्थं ज्ञात्वानुष्ठानमिति व्यवहितं जानाति । साक्षादिव ध्यायति । समाधत्ते च । मुक्तशिववर्गसहितानादिमुक्तशिवो ज्ञानयोगविविक्तानभिव्यक्तशिवकथञ्चिज्जीवन्मुक्तिमान् जीववर्गो वा शिवान्तरवर्गं जीवान्तरवर्गं स्वात्मानं च क्रमिकं तथात्वेन स्वरूपलक्षणेन यथाकथञ्चित्त्वेन केनाचिदुपहितेन तेन च निरपेक्षशक्तिसापेक्षशक्तिभूतप्रत्यक्षानुमानागमैकद्विप्रमाणक्रमिकं साक्षात्पश्यति । तदर्थं व्यवहितं जानाति साक्षादिव ध्यायति। समाधत्ते च । तावदेतावदुक्तं पौष्करकामिकादिके तावत्प्रमाणोदाहरणम् ।

पतिज्ञानैकगम्योऽयं पतिस्तद्धेतुरेव च ।
शिवप्रकाशकं ज्ञानं शिवज्ञानं परं स्मृतम् ॥
वेदाद्यपरविज्ञानं पशुपाशार्थदर्शकम् ।
यथा विलक्षणं चक्षुः क्षपायान्नृबिलालयोः ॥
तथा विलक्षणं चैव ज्ञानमेतत्परापरम् ।
कामिकादिशिवज्ञानं वेदार्थज्ञानमेव च ॥
समं यो मन्यते मोहात् तं प्रयत्नेन वर्जयेत् ।

In Public domain. Digitization Muthulakshmi Research Academy

पूर्वोत्तराविरोधेन सूत्रार्थोऽभिमतो भवेत् ।
इत्याद्युदूहनं तर्कं शुष्कतर्कं विवर्जयेत् ॥
तस्मादागमयुक्त्यैव सूक्ष्मार्थप्रविचारणम् ।
कर्तव्यन्नानुमानेन केवलेन विपश्चिता ॥
विवादाध्यासितं विश्वं विश्ववित्कर्तृपूर्वकम् ।
कार्यत्वादावयोस्सिद्धं कार्यं कुम्भादिकं यथा ॥
हेतूपदेशगम्यं यत् तत्परोक्षं प्रचक्षते ।
अपरोक्षं पुनः श्रेष्ठादनुष्ठानाद्भविष्यति ॥
२२०० परोक्षमस्थिरं प्राहुरपरोक्षं तु सुस्थितम् ।
ध्यायिता हि वशं पुंसां भवेत्प्रत्यक्षमैश्वरम् ॥
ज्ञानाद्ध्यानं भवेद्ध्यानाज्ज्ञानं भूयः प्रवर्तते ।
शिवस्य दर्शनं ज्ञानं योगस्तत्रैकचित्तता ॥
सर्वार्थभासकं ज्ञानं शिवयोगं तु शाश्वतम् ।
प्रकाशयति मुक्त्यर्थं मुमुक्षूणामयं शिवः ॥
ज्ञानं परोक्षध्यानञ्च साक्षात्कारः क्रमाद्भवेत् ।
अनुभूतौ प्रमाणानां परिनिष्ठा समाप्यते ॥
स्वतस्तथैव या ज्ञप्तिः किन्तत्रान्यैः प्रमान्तरैः ।
अतीन्द्रियं च यद्वस्तु तदत्रानुभवेन किम् ॥
अनुभवोऽपि मनोऽध्यक्षः प्रसिद्धः ष्ठुयथातितृट् ।
दृवी-सालम्बे हि अनित्यत्वन्निरालम्बोऽतिरश्न्यता ॥

In Public domain. Digitization Muthulakshmi Research Academy

पक्षद्वयेऽपि दोषोऽस्ति कथं ध्यायन्ति योगिनः ॥
ईश्वरः-
यथा शिशुरकिञ्चिज्ज्ञो मूढोऽप्युत्तानशायितः ।
परतत्त्वमजानन्तः पुरुषा बालकोपमाः ॥
अज्ञायमाने सज्ज्ञेयं ज्ञाते सज्ज्ञेयमिष्यते ।
ज्ञेयोद्भवं च विज्ञानं विज्ञानं तत्त्वज्ञात्मकम् ॥
ज्ञानेनैव तु तत्तुल्यप्राप्तिस्तत्र न संशयः ।
अनाख्येयस्य तत्त्वस्य निर्गुणस्य यशस्विनि ॥
गुणवद्ग्रहणं कृत्वा कथयेत् परमेश्वरम् ।
न योगं करणं चात्र आधारालम्बनं न च ॥
दृढश्च नासिकाग्रस्य वीक्षणान्न च मीलनम् ।
किञ्चिदाभासमात्रं तु कृत्वा कथये शिवम् ॥
निस्तत्त्वे निर्मलीभूते निर्विकल्पं प्रकल्पयेत् ।
शिवार्कशक्तिदीधित्या समर्थीकृतचिद्दृशा ॥
शिवं शक्त्यादिभिः सार्धं पश्यत्यात्मागतावृतिः ।
आद्यन्तशून्यममलं परिपूर्णमेकं
सूक्ष्मं परापरमनामयमप्रमेयम् ।
भावैकगम्यमजडं शिवतत्त्वमाहु-
श्चिच्छक्तिसंस्फुरणरूपमहात्मलिङ्गम् ॥
गलिते सर्वथा बन्धे विमुक्ते चाणवे मले ।

In Public domain. Digitization Muthulakshmi Research Academy

सर्वार्थद्योतिका शक्तिश्शिवस्यैव विजृम्भते ।
परसंवित्स्वरूपायाश्शक्तेरसति बन्धने ॥
परमात्रं प्रकाशेत मुक्ताणूनामनारतम् ।
ततो विमुक्तास्सर्वज्ञा न तु चिन्मात्रवेदिनः ॥
220 b सति बाह्ये तदज्ञानं वस्तुनि स्यात्तमस्कृतम् ।
तमसाच्छाद्यमाना हि न ते मुक्ताः कदाचन ॥

शिवप्रमाणम् -

नाध्यक्षान्नापि तल्लैङ्गं न शाब्दमपि शाङ्करम् ।
ज्ञानमाभाति विमलं सर्वदा सर्ववस्तुष्विति ॥

लक्षणोदाहरणम् -

समे कर्मणि सञ्जाते कालान्तरवशात्ततः ।
तीव्रशक्तिनिपातेन गुरुणा दीक्षितो यदा ॥
सर्वज्ञस्स शिवो यद्वत् किञ्चिज्ज्ञत्वविवर्जितः ।
शिवत्वव्यक्तिसंपूर्णः संसारी न पुनस्ततः ॥
सर्वज्ञाद्यं शिवैश्वर्यं लब्ध्वा स्वात्मनि राजते ।
तत्सायुज्यमिति प्राहुर्वेदागमपरायणाः ॥
सर्वज्ञता तृप्त्यनादिबोधस्स्वतन्त्रतानित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च निरामयात्मा विशुद्धदेहस्सशिवोमतः ॥
तत्र युक्तोऽप्यसौ तेन न समानगुणी कृतः ।
यावत्तावद्यथा तस्य तत्त्वव्याप्तिर्यथा विभुः ॥

In Public domain. Digitization Muthulakshmi Research Academy

साम्राज्याधिगमेऽप्युच्चैर्नृपसूनोः कृतार्थता ।
न षाड्गुण्यानभिज्ञस्य गतस्यापि न राजते ॥
स्वगुणव्यक्तये तेन स्रुवेणाज्याहुतीस्तु षट् ।
होमयेद्देशिको धीमान् प्रयोगेणामुना यथा ॥
सर्वज्ञो नित्यसंबोधस्स्वतन्त्रस्तृप्तिमान्भव ।
अलुप्तानन्तशक्तिस्त्वं हूस्वप्रासादपूर्वकम् ॥
आत्मन्निति पदोपेतं स्वाहान्ते दीपसंयुतम् ।
अपृथग्भूतमात्मानन्तत्समानगुणं स्मरन् ॥
नखाग्राच्चूलिका यावत्तत्त्वज्ञानदृशा गुरुः ।
अयमात्मा शिवत्वार्हश्शिथिलीकृतबन्धनः ॥
पतिशक्त्या शिवेनायं पाशव्रातश्च मद्वशः ।
तदमुक्ताम्रसंस्थानं स्वगुणोदययोग्यकम् ॥
स्पर्शवेधमणिप्रख्यश्चोदितोऽहं च शम्भुना ।
संस्पर्शाद्विमलीकृत्य कलौ धौतमिवाचिरात् ॥
करोति गुणसंपन्नं सतां मस्तकभूषणम् ।
मायाकर्ममलैर्बिन्दुरोधशक्त्याह्वयैर्मलैः ॥
पञ्चैस्तु पञ्चभिश्शम्भुशक्त्या दीक्षापुरस्सरम् ।
विमोचितो भवेत्सर्वं सर्वज्ञोऽनादिबोधयुक् ॥
सर्वकर्ता महान्नित्यतृप्तो व्याप्तस्स्वकर्मयुक् ।
२२।० अलुप्तानन्तशक्तिश्च स्वेच्छाज्ञानक्रियामलः ॥

In Public domain. Digitization Muthulakshmi Research Academy

स्वान्यप्रकाशविज्ञप्तिस्सच्चिदानन्दलक्षणम् ।
शिवस्य ये गुणास्तेषां समस्तास्सन्ति ते गुणाः ॥
चिदानन्दमनुप्राप्य शिवैकरसतां व्रजेत् ।
क्षीरे क्षीरमिवाभिन्नं विभिन्नं दृष्टिदृष्टिवत् ॥
शिवात्मनोस्सामरस्यं व्यज्येत गुणसाम्यतः ।
अपयाते मले तस्मिन् सर्वत्रोदितदृक्क्रियः ॥
निरातङ्को निराबाध्यं शिवत्वमधिगच्छति ।
शिवस्समानजातीयो ह्यात्मनस्सर्वलक्षणः ॥

शिवलक्षणम् ॥

देवी प्राह - सर्वज्ञादिगुणा देव गीयन्ते सर्वतश्शिवे ।
तानहं श्रोतुमिच्छामि भगवन्वक्तुमर्हसि ॥
ईश्वरः -- पश्यन् पाशांस्तथा तत्त्वान्युद्भवं प्रलयन्तथा ।
सर्वज्ञानाति देवीशि सर्वज्ञस्तेन चोच्यते ॥
सैश्वर्यस्सुसंपूर्णस्सर्वाश्रायनिराश्रयः ।
सर्वगः परिपूर्णश्च परितृप्तस्स उच्यते ॥
अनादित्वात् स्वभावाच्च सर्वात्मा गूढगोचरः ।
स्वशक्त्या बोधयेद्यस्मात् तस्माद्बोधः प्रकीर्तितः ॥
उत्पादयेज्जगत्कृत्स्नं त्रैलोक्यं सचराचरम् ।
स्थितिनाशं च देवेशि स्वतन्त्रस्तेन चोच्यते ॥
एते ह्यङ्गा महेशस्य वेदितव्याः प्रयत्नतः ।
मुच्यते सर्वपापेभ्यः शिवं याति निरामयमिति ॥

ततो नेति नेति कृतनियतिमात्रलब्धनिर्विषयत्वं किमकिञ्चित्पृथगवस्थितानां शिवभोगनाम्नां शिवत्वाभिव्यक्तिमनुभूयातिमोदन्ते ॥